CC-0. In Public Domain. Digitization by eGangotri

कर्मप्रयोगविधिः

❀ पञ्चगव्यम्—

गोमूत्रं[1] गोमयं[2] क्षीरं[3] दधि[4] सर्पिः[5] कुशोदकम्[6] । ईदृशं पञ्चगव्यं च पवित्रं कायशोधनम् ॥
नीलवर्ण्याश्च[7] गोमूत्रं कृष्णाया गोमयं तथा । कपिलाया[8] घृतं ग्राह्यं सप्रमाणं यथाविधिः[9] ॥
गायत्र्यादाय गोमूत्रं गन्धद्वारेति गोमयम् । आपवस्वेति[10] क्षीरं च दधिक्राव्णोति वै दधि ॥
घृतंमिमिक्षेति[11] घृतं देवस्यत्वा कुशोदकम् । दशवारं तु गायत्र्या प्रणवेन पुनः पिबेत् ॥

मेलनमन्त्राः—

गोमूत्रम्—ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि ॥
धियोयोनः प्रचोदयात् ॥

❀ पञ्चगव्य—जूठो, सूतक, उपाकर्म आदि नित्य-नैमित्तिक कर्म गर्दा चोखिन खानुपर्छ ।

१ एकभाग, २ आधा, ३ तीन, ४ दुइ, ५ एक, ६ एक भाग, ७ कैलीं, ८ मालोगाई, ९ दूध से दही राती गाईको लिनुपर्छ । नपाए सबै कैलो गाईको । सो पनि नपाए जस्तीको पाइन्छ । शुचिः ॥

विशेष—कुशोदकमा दूबो पनि मिसाउने चलन कहीं-कहीं छ ।

१० वा-आप्यायस्वेति, ११ वा तेजोसीति ।

चासनम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गोमयम्—ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

दुग्धम्—ॐ आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यम् । भवावाजस्यसङ्ग
आपवस्वहिरण्यवदश्ववत्सोमवीरवत् । वाजङ्गोमन्तमाभरस्वाहा ॥

दधि— ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यवाजिनः ।
सुरभिनोमुखाकरत्प्रणऽआयूꣳषितारिषत् ॥

घृतम्— ॐ तेजोसिशुक्रमस्यमृतमसिधामनामासि ।
प्रियन्देवानामनाधृष्टन्देवयजनमसि ॥
ॐ घृतम्मिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम ।
अनुष्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यम् ॥

कुशोदकम्—ॐ देवस्यत्वासवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मेलनम्— ॐ आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन। महेरणायचक्षसे ॥

अभिमन्त्रणम्—ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरी-
रिषः। मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तःसदमित्वाहवामहे ॥

भक्षणम्—ॐ यत् त्वगस्थिगतं पापं देहे तिष्ठति मामके। प्राशनात् पञ्चगव्यस्य दहत्वग्निरिवेन्धनम् ॥

ॐ भूर्भुवःस्वःतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि। धियोयोनःप्रचोदयात् १०

*

आसने उपविश्य आचमनम्—ॐ केशवाय नमः, ॐ नारायणाय नमः,
ॐ माधवाय नमः। हस्तप्रक्षालनम्—ॐ गोविन्दाय नमः।

प्राणानायम्य, भूशुद्धिः—

ॐ अपवित्रः पवित्रो वा सर्वावस्थांगतोऽपि वा। यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥
पुण्डरीकाक्षः पुनातु। आसनशुद्धिः—

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इष्टदेवतानां नमस्कारः—श्रीमन् महागणाधिपतये नमः, इष्टदेवताभ्यो नमः, ग्रामदेवताभ्यो नमः, कुलदेवताभ्यो नमः, उमामहेश्वराभ्यां नमः, सर्वेभ्यो देवेभ्यो नमः, ब्राह्मणेभ्यो नमः । निर्विघ्नमस्तु ।

ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥
विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान्। सरस्वतीं प्रणम्यादौ सर्वकार्यार्थसिद्धये ॥
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः। सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥

ॐ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः।
स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥

*

कर्मपात्रं पुष्पाक्षतोपरि स्थापनम्—ॐ यद्देवादेवहेडनन्देवासश्चकृमावयम् ॥ अग्निर्म्मातस्मादेनसोविश्वान्मुञ्चत्व ँ हसः ॥ ॐ यदिदिवायदिनक्तमेनाꣳसिचकृमावयम् ॥ वायुर्मातस्मादेनसोविश्वान्मुञ्चत्व ँ हसः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ यदि जाग्रद्यदि स्वप्नऽएनांᳬसि चकृमा वयम् ॥ सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वᳬ हसः ॥

तत्र पवित्रकुशान् क्षिपेत्—ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥ देवीरापोऽअग्रेगुवोऽअग्रेपुवोग्रऽइममद्य यज्ञन्नयताग्रे यज्ञपतिᳬ सुधातुं यज्ञपतिन्देवयुवम् ॥

जलम्–ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये ॥ शंयोरभिस्रवन्तु नः ॥

चन्दनम्—ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ॥
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

यवान्–ॐ यवोसि यवयास्मद्द्वेषो यवयारातीः ॥ दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥

तिलान्—ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् पृणाहिनः स्वाहा ॥
अक्षतान्—ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत ॥
अस्तोषतस्वभानवोविप्रानविष्ठयामर्तायोजान्वीन्द्रतेहरी ॥
पुष्पाणि—ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौ
व्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ॥
सर्वतः त्रिभिः कुशैः सेचनम्—ॐ पुण्डरीकाक्षः पुनातु ॥
ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥
प्रायश्चित्तगोदानम्—द्रेयद्रव्याय नमः, हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ अद्येह
अहं मम श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं देहशुद्ध्यर्थं इमां गां रुद्र-
दैवतां तत्प्रत्याम्नायीभूतां अमुक द्रव्यं अमुक दैवताकं अमुक
गोत्रायामुकशर्मणे ब्राह्मणाय सुपूजिताय तुभ्यमहं सम्प्रददे ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रार्थना–नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च। नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥
गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः। गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥

दानप्रतिष्ठा—अद्य कृतैतत् गोदानप्रतिष्ठासाङ्गतासिद्ध्यर्थं अमुक द्रव्यं अमुक गोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।

*

प्रतिज्ञासङ्कल्पः–हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ अद्येह श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकलजगत् सृष्टिकारिणो ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे युगे प्रह्लादाधिपत्ये मनौ सप्तमे सत्यत्रेताद्वापरान्ते कलियुगे कलियुगस्य प्रथमचरणे जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गते अमुक देशे अमुक ग्रामे अमुक नदी-तीर्थादिसन्निधौ अमुकस्थाने इह पुण्यभूमौ बौद्धावतारे अमुक श्रीशालिवाहनशाके

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

षष्टिसंवत्सराणां मध्ये अमुकनाम संवत्सरे श्रीसूर्ये अमुकायनगते अमुक ऋतौ मासानामुत्तमे सौरेण अमुक मासे चान्द्रेण अमुक-मासे अमुक पक्षे अमुक तिथौ अमुकवासरान्वितायां यथानाम नक्षत्र-योग-लग्न-करण-मुहूर्तान्वितायां अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते चन्द्रमसि अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथास्थानस्थितेषु सत्सु एवं ग्रहगुणविशेषेण विशिष्टायां शुभ-पुण्यतिथौ अद्येह अमुकगोत्रः अमुकप्रवरः अमुकनामा अहं मम सभार्यस्य सपुत्रस्य सपरिवारस्य सकुटुम्बस्यायुरारोग्यैश्वर्योत्तरोत्तर-हर्ष-विजयोदयपूर्वक-दारिद्र्य-दुःख-दुर्भिक्ष - दौर्मनस्य - दौर्भाग्योप-सर्ग-महामारी-त्रासोल्कापात-निर्घातभूकम्पादि सूचित - दोषोपशा-न्त्यर्थं, दुःस्वप्नसुस्वप्नतावाप्तिपूर्वक ग्रहदशान्तर्दशा-गोचरदशा-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दोषोपशान्त्यर्थं बाह्याभ्यन्तर-ज्वरातिसारापस्मार-श्वासकासादि समस्तरोगाणां झटिति निवृत्तिपूर्वकमारोग्यावाप्तये इहजन्मनि कायिक-वाचिक-मानसिक-सांसर्गिक-ज्ञाताज्ञात-स्पर्शास्पर्शाशन-भोजन-शयन-गमनादि कृतकर्मदोष निरसनद्वारा त्रिविधतापोप-शमनपूर्वकं श्रुति-स्मृति-पुराणोक्तफलप्राप्त्यर्थं धर्मार्थ-काम-मोक्ष-सिद्धिद्वारा सर्वव्याधिनिरसनपूर्वकं सर्वाभीष्टकामनासिद्ध्यर्थं विवि-धतापोपशमनार्थं यथाज्ञानेन यथामिलितोपचारैः दीप-कलश-गणेश पूजनपूर्वकं अमुककर्ममहं करिष्ये ।

★

दिग्बन्धनम्—वामहस्ते गौरसर्षपान् अक्षतान् गृहीत्वा सर्वदिक्षु विकिरेत्—

ॐ रक्षोहाविश्वचर्षणिरभियोनिमयोहते ॥ द्रोणेसधस्तमासदत् ॥

ॐ अपक्रामन्तु ते भूता ये भूता भूमिसंस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशः। सर्वेषामविरोधेन शिवकर्म समारभेत् ॥
भूतानि राक्षसा वापि यत्र तिष्ठन्ति केचन। ते सर्वेऽप्यपगच्छन्तु शुभकार्यं करोम्यहम् ॥
पूर्वस्यां पुण्डरीकाक्षः आग्नेय्यां श्रीधरस्तथा। दक्षिणे नारसिंहश्च नैर्ऋत्यां पातु माधवः ॥
पुरुषोत्तमो मे वारुण्यां वायव्यां च जनार्दनः। गदाधरस्तु कौबेर्यामीशान्यां पातु केशवः ॥
आकाशे च गदा पातु पाताले च सुदर्शनः ॥

ऋग्वेदादि पूजनम्, पञ्चोपचारैः प्रदक्षिणक्रमेण—ॐ पूर्वे ऋग्वेदाय नमः, ॐ दक्षिणे यजुर्वेदाय नमः, ॐ पश्चिमे सामवेदाय नमः, ॐ उत्तरे अथर्ववेदाय नमः।

★

ब्राह्मणवरणम्, कुश-तिल-यव-जलयुत-गन्ध-पुष्पाक्षत-ताम्बूल-पूगीफल-वस्त्र-द्रव्य-आभरणादीन्यादाय पूर्वाभिमुखोभूत्वा प्रत्यङ्मुखान् ब्राह्मणान्—हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ अद्येह पूर्वसङ्कल्पसिद्धिरस्तु अमुककार्य-सिद्ध्यर्थं तथास्मिन् कर्मणि परमेश्वरप्रीतिद्वारा सर्वाभ्युदयावाप्तये

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पुण्याहवाचनं च कर्तुं आचार्यत्वेन (ब्रह्मत्वेन, होतृत्वेन, ऋत्विजत्वेन च) अमुकगोत्रं (गोत्रान् वा) ब्राह्मणं (ब्राह्मणान् वा) एभिश्चन्दन-पुष्पाक्षत-पूगीफल-वासोद्रव्यादिभिरहं वृणे, वृतोऽस्मि (वृताः स्म वा) इति प्रतिवचनम् ॥

आचार्य-प्रार्थना—

आचार्य त्वं यथा स्वर्गे शक्रादीनां बृहस्पतिः। तथा त्वं मम यज्ञेऽस्मिन् आचार्यो भव सुव्रत ॥

ब्रह्म-प्रार्थना—

यथा चतुर्मुखो ब्रह्मा सर्ववेद विशारदः। तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ॥

होतृ-प्रार्थना—

भगवन् सर्वधर्मज्ञ सर्वधर्मविदांवर। वितते मम यज्ञेऽस्मिन् ऋत्विक् त्वं मे मखे भव ॥

पूर्वं ऋग्वेदपारायणार्थम्—

ऋग्वेदः पद्मपत्राक्षो गायत्री सोमदैवतः। अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥

दक्षिणे यजुःपारायणार्थम्—

कातराक्षो यजुर्वेदस्त्रैष्टुभो विष्णुदैवतः। काश्यपेयस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पश्चिमे सामपारायणार्थम्—

सामवेदस्तु पिङ्गाक्षो जाग्रतः शक्रदैवतः। भारद्वाजस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥

उत्तरे अथर्वपारायणार्थम्—

बृहन्नेत्रोऽथर्ववेदोऽनुष्टुभो रुद्रदैवतः। वैशम्पायन विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥

अमुककर्मणि अमुकदेवताया अमुकमन्त्रजपकर्मकर्तुं युष्मानहं वृणे।

ततो ब्राह्मणान् मधुपर्कादिना सम्पूज्य प्रार्थयेत्—

ब्राह्मणाः सन्तु मे शस्ताः पापात् पान्तु समाहिताः। वेदानां चैव दातारः पातारः सर्वदेहिनाम् ॥
जपयज्ञैस्तथा दानैर्होमैश्च विविधैः पुनः। देवानां च पितॄणां च तृप्त्यर्थं याजकाः कृताः ॥
येषां देहे स्थिता वेदाः पावयन्ति जगत्त्रयम्। रक्षन्तु सततं येऽस्मान् जपयज्ञे व्यवस्थिताः ॥
ब्राह्मणा जङ्गमं तीर्थं त्रिषु लोकेषु विश्रुतम्। येषां वाक्यामृतेनैव शुध्यन्ति मलिना जनाः ॥
पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः। सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः ॥
श्रोत्रियाः सत्यवाचश्च वेदध्यानरताः सदा। यद्वाक्यामृतसंसिक्ता ऋद्धिं यान्ति नरद्रुमाः ॥
अङ्गीकुर्वन्तु कर्मैतत् कल्पद्रुमसमाः स्थिताः। यथोक्तनियमैर्युक्ता मन्त्रार्थे स्थिरबुद्धयः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यत्कृपालोचनात् सर्वा ऋद्धयो वृद्धिमाप्नुयुः । मम यज्ञे सदा पूज्याः सन्तु वै नियमान्विताः ॥
अक्रोधनाः शौचपराः सततं ब्रह्मवादिनः । ब्रह्मध्यानरता नित्यं प्रसन्नमनसः सदा ॥
अदुष्टभाषिणः सन्तु मा सन्तु परनिन्दकाः । ममापि नियमा ह्येते भवन्तु भवतामपि ॥

पुण्याहवाचनम्—गन्ध-पुष्पाक्षत-ताम्बूल-पूगीफल-द्रव्य-वस्त्रादिभिस्त्रींश्चतुरः पञ्च वा ब्राह्मणान् सम्पूज्य हस्ते फलादिकं गृहीत्वा—ॐ अद्येहाऽमुकगोत्रोऽमुकप्रवरोऽमुकनामाहं ममामुककर्मणि पुण्याहवाचनार्थं नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् एभिश्चन्दन-पुष्पाक्षतपूगीफल-वासोद्रव्यादिभिर्युष्मान् वृणे ।

ॐ तत्सत् ३ ॐ विष्णुः ३ इत्यादि देशकालौ स्मृत्वा—ॐ अद्येहाऽमुकगोत्रस्यामुकनाम्नः मम अमुककर्मणि भो ब्राह्मणाः पुण्याहं भवन्तो ब्रुवन्तु पुण्याहं भवन्तो ब्रुवन्तु, पुण्याहं भवन्तो ब्रुवन्तु ।

ब्राह्मं पुण्यं महर्यं च सृष्टिस्थित्यन्तकारकम् । वेदवृक्षोद्भवं नित्यं तत् पुण्याहं ब्रुवन्तु मे ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ते च—ॐ पुण्याहम् ॐ पुण्याहम् ॐ पुण्याहम् ॥ ॐ पुनन्तुमादेवजनाः पुनन्तुमनसाधियः ॥ पुनन्तुविश्वाभूतानिजातवेदः पुनीहिमा ॥

पुनः पूर्ववत्—ॐ अद्येहेत्यादि मम अमुककर्मणि भो ब्राह्मणाः, स्वस्ति भवन्तो ब्रुवन्तु ३ ।

स्वस्तिर्या अविनाशाख्या पुण्या कल्याणकृद्यतः । विनायकप्रिया नित्यं स्वस्तयस्ता भवन्तु मे ॥

ॐ स्वस्तिः ३ ॐ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनःपूषाविश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥

ॐ अद्ययेहेत्यादि मम अमुककर्मणि भो ब्राह्मणाः, ऋद्धिं भवन्तो ब्रुवन्तु ३

सागरस्य यथा ऋद्धिर्महालक्ष्मीर्विनिःसृता । सम्पूर्णा चैव मर्यादा देवा ऋद्धिं ब्रुवन्तु मे ॥

ॐ ऋद्ध्यन्ताम् ३ । ॐ सत्रस्यऋद्धिरस्यगन्मज्योतिरमृताऽअभूम ॥ दिवम्पृथिव्याऽअध्याहृहामाविदामदेवान्स्वर्ज्योतिः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ अद्द्येहेत्यादि मम अमुककर्मणि भो ब्राह्मणाः, वृद्धिं भवन्तो ब्रुवन्तु ३

विष्णुना चाभ्यनुज्ञाता देवजातिसमन्विता। हरन्ती सर्वपापानि वृद्धिर्भवतु सा मम॥

ॐ वृद्ध्यन्ताम् ३। ॐ ज्यैष्ठ्यञ्चमऽआधिपत्यञ्चमेमन्न्युश्चमे भामश्च मेमश्चमेम्भश्चमेजेमाचमेमहिमाचमेवरिमाचमेप्रथिमाचमेवर्षिमाच मेद्राघिमाचमेवृद्धञ्चमेवृद्धिश्चमेयज्ञेनकल्पन्ताम् ॥

ॐ अद्येह मम अमुककर्मणि भो ब्राह्मणाः, कल्याणं भवन्तो ब्रुवन्तु ३

पृथिव्यामुद्धृतायां तु यत् कल्याणं पुरा कृतम्। ऋषिभिर्देवगन्धर्वैस्तत् कल्याणं ब्रुवन्तु मे॥

ॐ कल्याणम् ३। ॐ यथेमांवाचङ्कल्याणीमावदानिजनेभ्यः॥ ब्रह्मराजन्याभ्याᳬंशूद्रायचार्यायचस्वायचारणायच ॥ प्रियोदेवानां दक्षिणयैदातुरिहभूयासमयम्मेकामः समृद्ध्यतामुपमादोनमतु ॥

ॐ अद्येह मम अमुककर्मणि भो ब्राह्मणाः, शान्तिं भवन्तो ब्रुवन्तु ३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शङ्खासुरादिनाशेन या शान्तिस्तु धरातले । तथा शुद्धिर्हि देवानां सा शान्तिस्तु भवेन्न मम ॥

ॐ शान्तिः ३ । ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि ॥

ॐ अद्येह मम अमुककर्मणि भो ब्राह्मणाः, श्रियं भवन्तो ब्रुवन्तु ३

श्रीकल्याणमवाप्नोति चिरजीवी भवेन्नरः । सर्वव्याधिविनिर्मुक्तस्तस्य श्रियं ब्रुवन्तु मे ॥

ॐ श्रीः ३ । ॐ मनसः काममाकूतिंवाचः सत्यमशीय ॥ पशूनाꣳरूपमन्नस्यरसोयशः श्रीः श्रयताम् ॥

ॐ मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः । शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयोऽस्तु वः ॥

भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु । रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा ॥

श्रीर्वर्चस्वमायुष्यमारोग्यमाभिधात् पवमानं महीयते। धनंधान्यंपशुंबहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥

अव्याधिना शरीरेण मनसा च निराधिना। पूरयन्नार्थिनामाशास्त्वं जीव शरदां शतम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पुण्याहवाचनसमृद्धिरस्तु ।

पठन्तः साक्षतदूर्वादलपूगीफलानि यजमानायार्पयेयुः ।

*

दीपपूजनम् ; प्रज्वालनम्—ॐ स्थिरोभववीड्वङ्गऽआशुर्भववाज्यर्वन् ॥
पृथुर्भवसुखदस्त्वमग्नेः पुरीषवाहणः ॥

आवाहनम्—ॐ दीपनारायण इह आगच्छ इह तिष्ठ मम पूजां गृहाण ।
ॐ दीपनारायणाय नमः ॥

चन्दनाक्षतादिभिः पूजनम्-ॐ पृष्ठोदिविपृष्ठोऽअग्निःपृथिव्यामपृष्ठोविश्वाऽओषधीराविवेश। वैश्वानरःसहसापृष्ठोऽअग्निःमनोदिवासरिषस्पातुनक्तम् ॥

प्रार्थना—नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटि युगधारिणे नमः ॥

नमः कमलनाभाय नमस्ते जलशायिने । नमस्ते केशवानन्त वासुदेव नमोऽस्तु ते ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वासनाद्वासुदेवस्य वासितं भुवनत्रयम् । सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते ॥
शुभं भवतु कल्याणमारोग्यं सुखसम्पदः । सर्वदुःखविनाशाय दीपज्योति नमोऽस्तु ते ॥

*

कलशस्थापनम्—ईशानदिग्भागे अव्रणं दध्यक्षतादिभूषितं तैजसं मृण्मयं वा कलशं धान्योपरि स्थापयेत्—

भूमिशोधनम्-ॐ भूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्री॥ पृथिवींयच्छपृथिवीन्दृᳫहपृथिवीम्माहिᳫसीः ॥

धान्यस्थापनम्–ॐधान्यमसिधिनुहिदेवान्प्राणायत्वोदानायत्वाव्यानायत्वा॥ दीर्घामनुप्रसितिमायुषेधान्देवोवः सविताहिरण्यपाणिः प्रतिगृब्भ्णा त्वच्छिद्रेणपाणिनाचक्षुषेत्वामहीनाम्पयोसि ॥

कलशस्थापनम्–ॐ आजिघ्रकलशम्मह्यात्वाविशन्त्विन्दवः ॥ पुनरूर्ज्जानिवर्तस्वसानः सहस्रन्धुक्ष्वोरुधारापयस्वतीः पुनर्म्माविशताद्रयिः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तीर्थादिजलम्—ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्ज्जनीस्थो वरुणस्य ऽऋतसदन्यसि वरुणस्य ऽऋतसदनमसि वरुणस्य ऽऋतसदनमासीद ॥

ॐ इमम्मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥

गङ्गे च यमुने चैव गोदावरि सरस्वति ! नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

[1]सर्वौषधीः—ॐ याऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ॥ मनै नु बभ्रूणामह ᳫं शतन्धामानि सप्त च ॥

[2]पञ्चरत्नानि—ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ॥ सदाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ॥

पूगीफलादीनि—ॐ याः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणी ॥ बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्व ᳫं हसः ॥

१—मुरा जटामसी बोझो कूच पत्थर कुंकुम। चुत्रो हलेदो कच्चूर सस्यूँ मोथे यथाक्रम ॥

२—सुन, चाँदी, मूगा, मोती, लाजावर्त भए पनि। वा सुन हीरा पद्मराग नील मोती यिनै भए ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यवान्—ॐ ओषधयः समवदन्तसोमेनसहराज्ञा ॥
यस्मैकृणोतिब्राह्मणस्तꣳ राजन् पारयामसि ॥
ॐ यवोसियवयास्मद्द्वेषोयवयारातीर्दिवेत्वान्तरिक्षायत्वापृथिव्यैत्वा
शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥
गन्धम्—ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टांकरीषिणीम् ॥
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥
दूर्वा—ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषः परुषस्परि ॥
एवानोदूर्वेप्रतनुसहस्रेणशतेनच ॥
[१] सप्तमृदः—ॐस्योनापृथिवीनोभवानृक्षरानिवेशनि। यच्छानःशर्म्मसप्रथाः॥
पञ्चपल्लवैस्तन्मुखमाच्छादनम्—ॐ अश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता ॥

१—तबेला गोठ वल्मीक हात्तीसार चतुष्पथ । राजद्वार र दोभानबाट माटो लिनू शुभ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गोभाजऽइत्किलासथयत्सनवथपूरुषम् ॥
दध्यक्षतैर्भूषणम्–ॐ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूव ॥
यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयᳪंस्यामपतयोरयीणाम् ॥
वस्त्रयुग्मेनवेष्टनम्–ॐ बृहस्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु ॥
यद्दीदयच्छवसऽऋतप्रजाततदस्मासुद्रविणन्धेहिचित्रम् ॥
उपयामगृहीतोसिबृहस्पतयेत्वैषतेयोनिर्बृहस्पतयेत्वा ॥
आम्रपल्लवैस्तन्मुखमाच्छादनम्–ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन॥
ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥
वरुणमावाह्य पूजयेत्–ॐ तत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोह
विर्भिः ॥ अहेडमानोवरुणेहवोद्ध्युरुशᳪं समानऽआयुः प्रमोषीः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गङ्गादितीर्थान्यावाहयेत्—

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः । आयान्तु यजमानस्य दुरितक्षयकारकाः ॥

[१]कलशं स्पृष्ट्वाभिमन्त्रयेत्—

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥
कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ॥
अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः ॥

प्रार्थना—

देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः। त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपितृकाः ॥
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः । त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥ धूप-दीप-नैवेद्यादिभिः पूजयेत् ।

१—विष्णुधर्मोत्तरवचनात्—चतुः कलशे चतुः समुद्रपूजनम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

[1]गणेशपूजनम्, सङ्कल्पः—ॐ अद्येह मम अमुककर्मणि निर्विघ्नपरिसमाप्त्यर्थमादौ श्रीगणेशपूजनमहं करिष्ये।

आवाहनम्—(ॐ गणानान्त्वागणपतिᳫं हवामहेप्प्रियाणान्त्वाप्प्रियपतिᳫं हवामहेनिधीनान्त्वानिधिपतिᳫं हवामहेव्वसोमम ॥ आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ॥

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥
हे हेरम्ब त्वमेह्येहि अम्बिका त्र्यम्बकात्मज। सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभयुतः शिव ॥

१—आवाहनम् १, आसनम् २, पाद्यम् ३, अर्घ्यम् ४, स्नानम् ५, यज्ञोपवीतम् ६, वस्त्रम् ७, चन्दनम् ८, दूर्वाक्षतम् ९, धूपम् १०, दीपम् ११, नैवेद्यम् १२, आचमनीयम् १३, ताम्बूलम् १४, दक्षिणाद्रव्यम् १५, पादवन्दनम् १६।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नागस्य नागहार त्वं गणराज चतर्भुज । भूषितैः स्वायुधैर्दिव्यैः पाशाङ्कुशपरश्वधैः ॥
आवाहयामि पूजार्थं रक्षार्थं च मम क्रतो । इहागत्य गृहाण त्वं पूजां कर्तुं च रक्ष माम् ॥

ॐ भूर्भुवः स्वः गणपते सिद्धिबुद्धिसहित सायुध सवाहन साङ्गसपरिवार इह आगच्छ इह तिष्ठ मम (यजमानस्य) पूजां गृहाण यावत् पूजां करोमि तावत् त्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव ।)

ॐ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् ॥
सभूमिꣳ सर्व्वतस्पृत्त्वात्यतिष्ठद्दशाङ्गुलम् ॥

आवाहयामि देवेश रक्ष त्रैलोक्य रक्षक । इहागत्य गृहाण त्वं पूजां कर्तुं च रक्ष माम् ॥

आसनम्—ॐ पुरुषऽएवेदꣳ सर्व्वंयद्भूतंयच्चभाव्यम् ॥
उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥

रम्यं सुशोभनं दिव्यं सर्वसौख्यकरं शुभम् । आसनं च मया दत्तं गृहाण परमेश्वर ॥ आसनं समर्प०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पाद्यम्—ॐ एतावानस्यमहिमातोज्यायाँ २॥श्चपूरुषः ॥
पादोस्यव्विश्वाभूतानित्रिपादस्यामृतन्दिवि ॥
उष्णोदकं निर्मलं च सर्वसौगन्ध्यसंयुतम् । पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ॥ पाद्यं समर्पयामि

[१]अर्घ्यम्—ॐ त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत् पुनः ॥
ततोव्विष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥
गन्धपुष्पाक्षतोपेतं फलेन च समन्वितम् । अर्घ्यं गृहाण देवेश मया दत्तं हि भक्तितः ॥ अर्घ्यं समर्पया०

आचमनीयम्—ॐ ततोव्विराडजायतव्विराजोऽअधिपूरुषः ॥
सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥
कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् । आचम्यतां मया दत्तं प्रसीद परमेश्वर ॥ आचमनीयं स०

स्नानम्—ॐ तस्माद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदाज्ज्यम् ॥
पशूँस्ताँश्चक्रेवायव्यानारण्याग्ग्राम्याश्चये ॥

---

[१] अर्घ—जल, दुग्ध, कुश, दधि, अक्षता, यव औ तिल । दूर्वा, फलयुत अष्ट अष्टाङ्ग अर्घका गण ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गङ्गा सरस्वती रेवा पयोष्णी नर्मदाजलैः। स्नापितोऽसि मया देव ततः शान्तिं कुरुष्व मे ॥ स्नानं स०

पञ्चामृतस्नानम्, पयसा—ॐ पयः पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षे पयोधाः ॥ पयस्वतीः प्रदिशः सन्तु मह्यम् ॥

कामधेनुसमुद्भूतं सर्वेषां जीवनं परम्। पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥

शुद्धोदकम्-ॐ आपोऽअस्मान्मातरःशुन्धयन्तुघृतेननोघृतप्वःपुनन्तु। विश्वꣳहिरिप्रम्प्रवहन्तिदेवीरुदिदाभ्यःशुचिरापूतऽएमि ॥ शुद्धोदकस्नानं सम०

दध्ना—ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रणऽआयूꣳषितारिषत् ॥

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्। दध्यर्पितं मया देव स्नानाय प्रतिगृह्यताम् ॥ दधि सम०

शुद्धोदकस्नानम्—ॐ आपोऽअस्मान्मातरः शुन्धयन्तुघृतेननो० ॥

घृतेन—ॐ घृतम्मिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम ॥ अनुष्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् । घृतं तुभ्यं ददाम्येतत् स्नानाय प्रतिगृह्यताम् ॥ घृत सम०

शुद्धोदकस्नानम्—ॐ आपोऽअस्मान्मातरः शुन्धयन्तुघृतेनर्नो० ॥

मधुना—ॐमधुव्वाताऽऋतायतेमधुक्षरन्तिसिन्धवः । माध्वीर्नःसन्त्वोषधीः ॥
मधुनक्तमुतोषसोमधुमत्पार्थिवᳬंरजः ॥ मधुद्यौरस्तुनः पिता ॥
मधुमान्नोवनस्पतिर्मधुमाँ२॥ऽअस्तुसूर्यः ॥ माध्वीर्गावोभवन्तुनः ॥

तत्पुष्पसमुद्भूतं सुस्वादु मधुरं मधु । तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥ मधु सम०

शुद्धोदकस्नानम्—ॐ आपोऽअस्मान्मातरः शुन्धयन्तुघृतेनर्नो० ॥

शर्करया—ॐ अपाᳬंरसमुद्वयसᳬंसूर्येसन्तᳬंसमाहितम् ॥ अपाᳬंरसस्य
योरसस्तन्वोगृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायत्त्वाजुष्टं गृह्णाम्येषते
योनिरिन्द्रायत्त्वाजुष्टतमम् ॥

इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका । मलापहारिणी दिव्या स्नानाय प्रतिगृह्यताम् ॥ शर्करा स०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

[1]पञ्चमृतस्नानम्–ॐ पञ्चनद्यः सरस्वतीमपियन्तिसस्रोतसः ॥
सरस्वतीतुपञ्चधासोदेशेभवत् सरित् ॥ पञ्चामृतस्नानं समर्पयामि
शुद्धोदकस्नानम्—ॐ आपोऽअस्मान्मातरः शुन्धयन्तुघृतेननो० ॥
यज्ञोपवीतम्–ॐ ब्रह्मयज्ञानंप्रथमंपुरस्ताद्विसीमतः सुरुचोवेनऽआवः ॥
सबुध्न्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्चविवः ॥
नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतात्रयम् । उपवीतं चोत्तरीयं गृहाण परमेश्वर ॥ यज्ञोपवीतं सम०
वस्त्रम्—ॐ तस्मादश्वाऽअजायन्तयेकेचोभयादतः ॥
गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ॥
सर्वभूताधिके सौम्ये लोकलज्जानिवारणे । मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥ वस्त्रं सम०
चन्दनम्—ॐ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषञ्जातमग्रतः ॥
तेनदेवाऽअयजन्तसाध्याऽऋषयश्चये ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥
(गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥)

दूर्वापुष्पाक्षतम्—ॐ यत्पुरुषंव्यदधुः कतिधाव्यकल्पयन् ॥
मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्येते ॥

ॐ धान्यराजान् एवमाङ्गल्यान् कुंकुमाक्तान् सुशोभनान् । मया निवेदितं भक्त्या गृहाण परमेश्वर ॥
दूर्वाक्षतान् समर्पयामि ॥

दूर्वान्—ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषः परुषस्परि ॥
एवानोदूर्वेप्रतनुसहस्रेणशतेनच ॥

पुष्पम्-ॐश्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम्॥
इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण ॥

ॐ माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ! मयाऽनीतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥)
(अक्षतान्—ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विन्द्रतेहरी ॥)

धूपम्—ॐ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यः कृतः ॥
ऊरूतदस्यषद्वैश्यः पद्भ्या ꣳ शूद्रोऽअजायत ॥

ॐ वनस्पतिरसोद्भूतो गन्धाढ्यो गन्धउत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ धूपं स०

दीपम्—ॐ चन्द्रमामनसोजातश्चक्षोः सूर्योऽअजायत ॥
श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत ॥

ॐ आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया । दीपं गृहाण देवेश त्रैलोक्य तिमिरापहम् ॥ दीपं स०

नैवेद्यम्—ॐ नाभ्याऽआसीदन्तरिक्ष ꣳ शीर्ष्णोद्यौः समवर्तत ॥
पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथालोकाँ२॥ऽअकल्पयन् ॥

ॐ शर्कराघृतसंयुक्तं मधुरं स्वादु चोत्तमम् । उपहारं समानीतं नैवेद्यं प्रतिगृह्यताम् ॥ नैवेद्यं स०

आचमनीयम्—ॐ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ एलोशीरलवङ्गादि कर्पूरादि सुवासितम् । प्राशनायाहृतं तोयं गृहाण परमेश्वर ॥

(ताम्बूलं स०, वस्त्रालङ्कारादि स०, ऋतुफलं स०)

दक्षिणा—ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

प्रदक्षिणा—ॐ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः ॥

देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥

यानि कानि च पापानि जन्मान्तर कृतानि च । तानि तानि प्रणश्यन्तु प्रदक्षिण पदे पदे ॥

स्तुतिः—नारिकेलादिकं सवस्त्रं पुरतः पात्रे निधाय—

ॐ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक । भक्तानामभयं कर्ता त्राता भव भवार्णवात् ॥

द्वैमातर कृपासिन्धो षाण्मातुर जगत् प्रभो ! वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ॥

अनेन फलदानेन फलदोऽस्तु सदा मम ॥—निवेदयेत् ।

पुष्पाञ्जलिम्—ॐ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥

तेहनाकम्महिमानः सचन्तयत्रपूर्वेसाद्ध्याः सन्तिदेवाः ॥

ॐ नाना सुगन्धि पुष्पाणि देशकालोद्भवानि च । पुष्पाञ्जलिं मया दत्तं गृहाण परमेश्वर ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय ।
नागाननाय श्रुतियज्ञ विभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ॥
वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

★

रक्षाबन्धनपूजनम्—यवदूर्वासर्षपगोमयचन्दनदधिसहितां रक्षां ताम्रपात्रे निधाय पात्रं स्पृशन् नारायणकवचं पठेत्—

पूर्वे रक्षतु गोविन्द आग्नेय्यां धरणीधरः । याम्यां रक्षतु वाराहो नारसिंहस्तु नैर्ऋते ॥
वारुण्यां केशवो रक्षेत् वायव्यां मधुसूदनः । उत्तरे श्रीधरो रक्षेत् ऐशान्यां तु गदाधरः ॥
ऊर्ध्वं गोवर्धनो रक्षेदधस्तात् तु महेश्वरः । एवं दशदिशो रक्षेद् वासुदेवो जनार्दनः ॥
यज्ञाग्रं रक्षताच्छङ्खः पृष्ठे वै पद्ममुत्तमम् । वामपार्श्वे गदा रक्षेत् दक्षिणे च सुदर्शनम् ॥
उपेन्द्रः पातु ब्रह्माणमाचार्यं पातु वामनः । ऋग्वेदमच्युतो रक्षेद् यजुर्वेदमधोक्षजः ॥
कृष्णो रक्षतु सामानमथर्वाणं च माधवः । उपविष्टाँश्च विप्राँस्ताननिरुद्धोऽभिरक्षतु ॥
यजमानं सपत्नीकं पुण्डरीकाक्ष रक्षतु । रक्षाहीनं च यत् स्थानं तत्सर्वं रक्षताद् हरिः ॥
वेदमन्त्रैस्तु कर्तव्या रक्षा यवैस्तु सर्षपैः । कृत्वा पोट्टलिकां पश्चाद् बध्नीयाद् दक्षिणे करे ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पूजयेत्-- ॐ नतद्रक्षा ꣳसिनपिशाचास्तरन्तिदेवानामोजः प्रथमजꣳह्येतत्। योबिभर्तिदाक्षायण꣸ हिरण्य꣸ सदेवेषुकृणुतेदीर्घमायुः समनुष्येषुकृणु तेदीर्घमायुः ॥ यदाबध्नन्दाक्षायणाहिरण्य꣸ शतानीकायसुमनस्य मानाः । तन्मऽआबध्नामिशतशारदायुष्माञ्जरदष्टिर्यथासम् ॥
ॐ रक्षोहणंबलगहनं वैष्णवीमिदमहन्तं बलगमुत्किरामियम्मेनि-ष्ट्योयममात्योनिचखानेदमहन्तं बलगमुत्किरामियम्मेसमानो यमस मानोनिचखानेदमहन्तं बलगमुत्किरामियम्मेसबन्धुर्यमसबन्धुर्निच-खानेदमहन्तंबलगमुत्किरामियम्मे सजातोयमसजातोनिचखानोत्कृ-त्याङ्किरामि ॥ ॐ स्वराडसिसपत्नहासत्रराडस्यभिमातिहाजनराडसि रक्षोहासर्वराडस्यमित्रहा ॥ ॐ रक्षोहणोवोबलगहनः प्रोक्षामिवै ष्णवान्रक्षोहणोवोबलगहनोवनयामिवैष्णवान्रक्षोहणोवो बल

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गहनोवस्तृणामिऽवैष्णवान्रक्षोहणौवांऽवलगहनंउपदधामिऽवैष्णवी
रक्षं हणौवांऽवलगहनौपर्यूहामिऽवैष्णवीऽवैष्णवमसिऽवैष्णवाःस्त्थ ॥
ॐ त्वँयविष्ठदाशुषोनॄँः पाहिशृणुधींगिरः ॥ रक्षातोकमुतत्मना ॥
ॐ सप्तऽऋषयः प्रतिहताः शरीरेसप्तरक्षन्तिसदमप्प्रमादम् ॥
सप्तापः स्वपतोलोकमीयुस्तत्रजागृतोऽअस्वप्नजौसत्रसदौचदेवौ ॥

*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ग्रहशान्तिप्रयोगः[१]

कुश-यव-तिल-जलान्यादाय सङ्कल्पः—ॐ अद्येत्यादि देशकालौ स्मृत्वा अमुक शर्मा अमुककर्मणि निर्विघ्नकामो नवग्रहमखेनाहं यक्ष्ये ।

अत्रावसरे चत्वार ऋत्विजो एको ब्रह्माऽपरो होता इत्येवं स्वगृह्योक्तविधिना अग्नि-स्थापनं कुर्युस्तच्चैवं याजुर्वैदिकेन विधिना—

सुखोपविष्ट गार्ग्यं तु कौशिकः परिपृच्छति । निखिलां ग्रहशान्ति मे भगवन् वक्तुमर्हसि ॥
गार्ग्य उवाच—देवदानवगन्धर्वा यक्षराक्षसकिन्नराः । पीडिता ग्रहपीडाभिः किं पुनर्भुवि मानवाः ॥
शनैश्चरेण सौदासो नरमांसे नियोजितः । राहुणा पीडितो राजा नलो भ्रान्तो महीतले ॥
अङ्गारकविरोधेन रामो राष्ट्राद् विवासितः । अष्टमेन शशांकेन हिरण्यकशिपुर्हतः ॥
रविणा सप्तमस्थेन हतो राजा सुयोधनः । पाण्डवाः बुधपीडायां विकर्मणि नियोजिताः ॥
षष्ठमोशनसा युद्धे हिरण्याक्षो निपातितः । एते चान्ये च बहवो ग्रहदोषैः सुपीडिताः ॥
—स्कन्दपुराणे ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

परिसमूहनम्—ॐ यद्देवादेवहेडनन्देवासश्चकृमावयम् ॥
अग्निर्मातस्मादेनसोविश्वान् मुञ्चत्वᳪहसः ॥
उपलेपनम्-ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥
मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तः सदमित्वाहवामहे ॥
उल्लेखनम्—ॐ त्वामिद्धिहवामहेसातौवाजस्यकारवः ॥
त्वांवृत्रेष्विन्द्रसत्पतिन्नरस्त्वाङ्काष्ठासर्वतः ॥
उद्धरणम्—ॐ व्रतङ्कृणुताग्निर्ब्रह्माग्निर्यज्ञोवनस्पतिर्यज्ञियः ॥
दैवीन्धियंमनामहेसुमृडीकामभिष्टयेवर्चोधांयज्ञवाहसᳪ सुतीर्थानोऽ-
असद्वशे ॥
अभ्युक्षणम्—ॐ देवस्यत्वासवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम् ।
अग्नये जुष्टङ्गृह्णाम्यग्नीषोमाभ्यान्त्वाजुष्टङ्गृह्णामि ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उपसमाधानम्—ॐ अग्निर्मूर्द्धादिवः ककुत्पतिः पृथिव्याऽअयम् ॥
अपा ꣳ रेता ꣳ सिजिन्वति ॥

समिदाधनम्—ॐ समिधाग्निन्दुवस्यत घृतैर्बोधयतातिथिम् ॥
आस्मिन्नूहव्याजुहोतन ॥

अभ्युक्षणम्—ॐ मयिगृह्णाम्यग्रेऽअग्निꣳ रायस्पोषायसुप्रजास्त्वायसुवीर्याय
मामुदेवताः सचन्ताम् ॥

ब्रह्मासनं, दक्षिणतः—ॐ हिरण्यगर्भः समवर्तताग्रेभूतस्यजातः पतिरेकऽ-
आसीत् । सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ॥

प्रणीता, उत्तरतः—ॐ आपो हिष्ठामयोभुवस्तानऽऊर्जेदधातन ॥
महेरणायचक्षसे ॥

परिस्तरणम्—ॐ कयानश्चित्रऽआभुवदूतीसदावृधः सखा ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कयाशचिष्ठयावृता ॥

पवित्रे द्वे—ॐ पवित्रेस्त्थोवैष्णव्यौसवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः ॥

आज्यनिरूपणम्—ॐ इषेत्वोर्ज्जेत्त्वावायवस्त्थदेवोवःसविताप्प्रार्पयतुश्रेष्ठतमायकर्म्मणऽआप्यायध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघसꣳ सोध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून् पाहि ॥

स्रुवप्रतपनम्—ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवेसुहवꣳ शूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्र ꣳ स्वस्तिनोमघवाधात्विन्द्रः ॥

स्रुवः सम्मार्जनम्—ॐ अनिशितोसिसपत्नक्षिद्वाजिनीन्त्वावाजेद्ध्यायैसम्मार्ज्मि ॥ सम्मार्जनकुशानुत्तरे क्षिपेत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्रुवः पुनः प्रतपनम्—ॐ प्रत्युष्टꣳ रक्षः प्रत्युष्टाऽअरातयो निष्टप्तꣳ रक्षो
निष्टप्ताऽअरातयः। उर्वन्तरिक्षमन्वेमि ॥

उत्पवनम्—ॐ देवस्यत्वासवितुः प्रसवऽउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्यस्य
रश्मिभिः। तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामःपुनेतच्छकेयम् ॥

उदिङ्गनम्—ॐ तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमाः ॥
तदेवशुक्रन्तद्ब्रह्मताऽआपः सप्रजापतिः ॥

समिधादानम्–ॐ समिधाग्निन्दुवस्यतघृतैर्बोधयतातिथिम् ॥
आस्मिन् हव्याजुहोतन ॥

पर्युक्षणम्–ॐ भूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्री ॥
पृथिवींयच्छपृथिवींदृꣳहपृथिवींमाहिꣳसीः ॥

मूलहोमाहुतयः—ॐ प्रजापतये स्वाहा। ॐ इन्द्राय स्वाहा। ॐ अग्नये

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्वाहा। ॐ सोमाय स्वाहा। ॐ अन्तरिक्षाय स्वाहा। ॐ भूः स्वाहा। ॐ भुवः स्वाहा। ॐ स्वः स्वाहा। एवं च वैदिकोऽग्निः संस्कृतो भवति।

एवमग्नौ प्रणीते आचार्यो यजमानान्वितो वेद्या अष्टदले नवग्रहमण्डले सूर्यादिग्रहदेवतानां आवाहन-स्थापनपूर्वकं पूजा कुर्यात्॥ कुश-यव-जलान्यादाय—ॐ अद्येत्यादि पूर्वसङ्कल्पसिद्धिरस्तु सूर्यादि ग्रहदेवतानां आवाहन-स्थापन-पूजनं चाहं करिष्ये।

ॐ प्रणवस्य परब्रह्म ऋषिः परमात्मा देवता गायत्री छन्दो व्याहृतीनां क्रमेण जमदग्नि-भरद्वाज-भृगव ऋषयोऽग्निवायुस्सूर्या देवता दैवीगायत्रीदैव्युष्णिकदैवीबृहत्यश्छन्दांसि सूर्याद्यावाहने विनियोगः॥ केचित् तत्तन्मन्त्रानप्यावाहने आहुः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सूर्यम्—नवग्रहमण्डलमध्ये कर्णिकायां वर्तुले द्वादशांगुले मण्डले रक्तपुष्पाक्षतैः पूजयेत् किरीटिनं पद्मारूढं हस्तद्वय-धृतपद्मद्वयं लोहितवर्णं रक्ताम्बरधरं सप्ताश्वरथस्थं सप्तार्चिषं प्राङ्मुखम्—

ॐ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे ॥ देवाँ२॥ऽआसादयादिह ॥

ॐ भूर्भुवः स्वः कलिङ्गदेशोद्भव ! काश्यपगोत्र ! सूर्य ! इहागच्छ इत्यावाह्य इह तिष्ठेति स्थापयित्वा। एतानि पाद्यार्घ्याचमनीयपुनराचमनीयानि ॐ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ एतानि पाद्यादीनि इदं रक्तचन्दनं ॐ सूर्याय नमः। एतानि रक्तपुष्पाणि ॐ सूर्याय नमः। एष धूपः ॐ सूर्याय नमः, इदं दीपं, इदं उपायनं रक्तवस्त्रं बृहस्पतिदैवतं ॐ सूर्याय नमः ॥१॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सोमम्—आग्नेयदले चतुरस्रे चतुर्विंशांगुले मण्डले श्वेतपुष्पाक्षतैः किरीटिनं द्विभुजं वरगदाहस्तं श्वेतवर्णं श्वेतदशाश्वरथस्थं आदित्याभिमुखम्—

ॐ अप्स्वग्नेसधिष्टवसौषधीरनुरुध्यसे ॥ गर्भैसञ्जायसेपुनः ॥

ॐ भूर्भुवः स्वः यमुनातीरोद्भव ! आत्रेयगोत्र सोम ! इहागच्छ इति आवाह्य इह तिष्ठ इति स्थापयित्वा पाद्याद्युपचारैः पूजयेत् ।

ॐ इमन्देवाऽअसपत्नᳬं सुवध्वम्महतेक्षत्रायमहतेज्यैष्ठ्यायमहतेजानराज्यायेन्द्रस्येन्द्रियाय ॥ इमममुष्यपुत्रममुष्यैपुत्रमस्यैविशऽएषवोमीराजासोमोस्माकम्ब्राह्मणानाᳬं राजा ॥ ॐ सोमाय नमः ॥२॥

भौमम्—दक्षिणदले त्रिकोणे त्र्यंगुले मण्डले रक्तपुष्पाक्षतैः किरीटिनं रक्तवर्णं रक्तमाल्याम्बरधरं चतुर्भुजम्—

ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानः शर्म्मसप्रथाः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ भूर्भुवः स्वः अवन्तीसमुद्भव ! भारद्वाजगोत्र भौम ! इहागच्छेह तिष्ठ
ॐ अग्निर्मूर्द्धादिवःककुत्पतिःपृथिव्याऽअयम् । अपाꣳरेताꣳसिजिन्वति ॥
ॐ भौमाय नमः ॥३॥

बुधम्—ईशानदले बाणाकारे चतुरङ्गुले पीतपुष्पाक्षतैः किरीटिनं पीतवस्त्रं पीतमाल्यानुलेपनं पीतवर्णं चतुर्भुजं वर-खड्ग-चर्म-गदाहस्तं सिंहस्थमादित्याभिमुखम्—

ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरेस्वाहा ॥
ॐ भूर्भुवः स्वः मगधदेशोद्भव ! आत्रेयगोत्र! बुध! इहागच्छ इह तिष्ठ
ॐ उद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्तेसꣳ सृजेथामयञ्च ।
अस्मिन्त्सधस्थेऽअद्ध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत ॥
ॐ बुधाय नमः ॥४॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बृहस्पतिम्–उत्तरदले दीर्घे चतुरस्रे षडंगुले मण्डले पीतपुष्पाक्षतैः किरीटिनं पीत-
वर्णं पीतमाल्याम्बरधरं चतुर्भुजं वराक्षसूत्रकमण्डलुधरमादित्याभिमुखम्–
ॐ इन्द्रऽआसान्नेताबृहस्पतिर्दक्षिणायज्ञः पुरऽएतुसोमः ॥
देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्रम् ॥
ॐ भूर्भुवः स्वः सिन्धुदेशोद्भव ! आङ्गिरसगोत्र ! बृहस्पते ! इहागच्छ
इह तिष्ठ ॐ बृहस्पतेऽअतियदर्य्योऽअर्हाद्युमद्विभातिक्रतुमज्जनेषु ॥
यद्दीदयच्छवसऽऋतप्प्रजाततदस्मासुद्रविणन्धेहिचित्रम् ॥
ॐ बृहस्पतये नमः ॥५॥
शुक्रम्–पूर्वदले पञ्चकोणे नवाङ्गुले मण्डले शुक्लपुष्पाक्षतैः किरीटिनं श्वेतवर्णं
श्वेतमाल्याम्बरधरं चतुर्भुजं वराक्षसूत्रदण्डकमण्डलुधरमादित्याभिमुखम्–
ॐ शुक्रज्ज्योतिश्चचित्रज्ज्योतिश्चसत्यज्ज्योतिश्चज्ज्योतिष्मांश्च ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शुक्रश्चऽऋतपाश्चात्यꣳ हाः ॥
ॐ भूर्भुवः स्वः भोजकटदेशोद्भव ! भार्गवगोत्र ! शुक्र ! इहागच्छ इह
तिष्ठ ॐ अन्नात्परिस्रुतोरसम्ब्रह्मणाऽव्यपिबत्क्षत्रम्पयःसोमम्प्रजापतिः
ऋतेनसत्यमिन्द्रियंविपानꣳ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयामृत-
म्मधु ॥ ॐ शुक्राय नमः ॥६॥
शनिम्—पश्चिमदले धनुषि द्व्यंगुले मण्डले कृष्णपुष्पाक्षतैः किरीटिनं कृष्णमा-
ल्याम्बरधरं चतुर्भुजं वरत्रिशूलधनुर्बाणधरं गृध्रवाहनमादित्याभिमुखम्—
ॐ प्रजापतेनत्वदेतान्यन्यो विश्वारूपाणिपरिताबभूव ॥
यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयꣳ स्यामपतयोरयीणाम् ॥
ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यपगोत्र शनैश्चर ! इहागच्छ इह
तिष्ठ ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये। शंयोरभिस्रवन्तु नः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ शनैश्चराय नमः ॥७॥

राहुम्—नैर्ऋत्यदले सूर्याकारे द्वादशांगुले मण्डले कृष्णपुष्पाक्षतैः किरीटिनं कृष्णवर्णं करालवदनं चतुर्भुजं वरखड्गचर्मधनुर्धरं कृष्णमाल्याम्बरधरं सिंहस्थमादित्याभिमुखम्—

ॐ आयङ्गौः पृश्निरक्रमीदसदन्मातरम्पुरः। पितरञ्चप्प्रयन्त्स्वः ॥

ॐ भूर्भुवः स्वः राठिनदेशोद्भव पैठिनसिगोत्र! राहो! इहागच्छ इह तिष्ठ ॐ कयानश्चित्रऽआभुवदूतीसदावृधः सखा ॥ कयाशचिष्ठयाव्वृता ॥ ॐ राहवे नमः ॥८॥

केतून्—वायव्यदले ध्वजाकारे मण्डले धूम्रपुष्पाक्षतैः किरीटिनो धूम्रान् द्विभुजान् गदाहस्तान् विवृतमुखान् गृध्रवाहनान् आदित्याभिमुखान्—

ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोवेनऽआवः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सबुध्न्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्चविवः ॥
भूर्भुवः स्वः अन्तर्वेदिसमुद्भवाः जैमिनिगोत्राः केतवः इहागच्छ इह तिष्ठ ॐ केतुङ्कृण्वन्नकेतवेपेशोमर्याऽअपेशसे ॥ समुषद्भिरजायथा ॥ ॐ केतुभ्यो नमः ॥९॥
अधिदेवताः सर्वाः श्वेतपुष्पतण्डुलैः आवाह्य स्थापयित्वा पूजयेत् ॥
ईश्वरम्—सूर्यस्य दक्षिणपार्श्वे ॐ त्र्यम्बकमिति वशिष्ठ ऋषिः रुद्रो देवता अनुष्टुप्छन्दः ईश्वरस्यावाहनपूजनयोर्विनियोगः ॥ ॐ त्र्यम्बकं यजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय-मामृतात् ॥ ॐ भूर्भुवः स्वः ईश्वर! इहागच्छ इह तिष्ठ ॥ ॐ ईश्वराय नमः ॥१॥
उमाम्—सोमस्य दक्षिणपार्श्वे ॐ श्रीश्चतेत्युत्तरनारायण ऋषिः उमा देवता

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

त्रिष्टुपूछन्दः उमाया आवाहनपूजनयोर्विनियोगः ।

ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ।
इष्णन्निषाणामुम्मऽइषाणसर्वंलोकम्मऽइषाण ॥

ॐ भूर्भुवः स्वः उमे इहागच्छ इह तिष्ठ ॥ ॐ उमायै नमः ॥२॥

स्कन्दम्—भौमस्य दक्षिणपार्श्वे ॐ यदक्रन्द इति भास्कर-जमदग्नि-दीर्घतमस ऋषयः स्कन्दो देवता त्रिष्टुपूछन्दः स्कन्दमावाहनपूजनयोर्विनियोगः। ॐ यदक्रन्दःप्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवापुरीषत्
श्येनस्यपक्षाहरिणस्यबाहूऽउपस्तुत्यम्माहिजातन्तेऽअर्वन् ॥

ॐ भूर्भुवः स्वः स्कन्द ! इहागच्छ इह तिष्ठ ॐ विष्णवे नमः ॥३॥

विष्णुम्—बुधस्य दक्षिणपार्श्वे ॐ विष्णोरराटमिति उतथ्य ऋषिर्विष्णुर्देवता यजुर्विष्णोरावाहनपूजनयोर्विनियोगः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ विष्णोरराटमसिविष्णोः श्नप्त्रेस्त्थोविष्णोः स्यूरसिविष्णोर्ध्रुवोसि ॥
वैष्णवमसिविष्णवेत्त्वा ॥
ॐ भूर्भुवः स्वः विष्णो ! इहागच्छ इह तिष्ठ । ॐ विष्णवे नमः ॥
ब्रह्माणम्-गुरोर्दक्षिणपार्श्वे—ॐ आब्रह्मन्निति प्रजापतिर्ऋषिर्ब्रह्मा देवता यजुर्ब्रह्मणः आवाहनपूजनयोर्विनियोगः ॥
ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्न्यः शूरऽइषव्व्योतिव्याधीमहारथो जायतान्दोग्ध्रीधेनुर्वोढानड्वानाशुःसप्तिःपुरन्धिर्योषाजिष्णूरथेष्ठाः ॥ सभेयोयुवास्ययजमानस्यव्वीरोजायतान्निकामेनिकामेनः पर्ज्जन्योवर्षतुफलवत्योनऽओषधयःपच्यन्तांयोगक्षेमोनःकल्पताम् ॥
ॐ भूर्भुवः स्वः ब्रह्मन ! इहागच्छ इह तिष्ठ । ॐ ब्रह्मणे नमः ॥
इन्द्रम्-शुक्रस्य दक्षिणपार्श्वे ॐ सजोषाऽइन्द्रेति विश्वामित्र ऋषिरिन्द्रो

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

देवता इन्द्रस्यावाहन-पूजनयोर्विनियोगः ।
ॐ सजोषाऽइन्द्रसगणोमरुद्भिः सोमम्पिबवृत्रहाशूरविद्वान् ॥
जहिशत्रूँ रपमृधोनुदस्वाथाभयङ्कृणुहिविश्वतोनः ॥
ॐ भूर्भुवः स्वः इन्द्र इहागच्छ इह तिष्ठ ॐ इन्द्राय नमः ॥
यमम्—शनेर्दक्षिणपार्श्वे ॐ यमायत्वेति मन्त्रस्य दध्यङ्ङाथर्वणऋषिर्यमो
देवता यमस्य आवाहनपूजनयोर्विनियोगः ।
ॐ यमायत्वामखायत्वासूर्यस्यत्वातपसे ।
देवस्त्वासवितामद्ध्वानक्तुपृथिव्याः सꣳस्पृशस्पाहि ॥
अर्चिरसिशोचिरसितपोसि ॥
ॐ भूर्भुवः स्वः यम इहागच्छ इह तिष्ठ ॐ यमाय नमः ॥
कालम्—राहोर्दक्षिणपार्श्वे ॐ कार्षिरसीति मन्त्रस्य प्रजापतिऋषिर्ब्रह्मा देवता

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कालप्रीतये कालस्य आवाहनपूजनयो र्विनियोगः ।
ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराज० (पृष्ठ ४६)
ॐ भूर्भुवः स्वः काल इहागच्छ इह तिष्ठ ॐ कालाय नमः ।

चित्रगुप्तम्—केतूनां दक्षिणपार्श्वे ॐ चित्रावसोरिति देवा ऋषयश्चित्रगुप्ता
देवता जगतीछन्दः चित्रगुप्तस्य आवाहनपूजनयोर्विनियोगः ।
ॐ चित्रावसोस्वस्तितेपारमशीय ।
ॐ भूर्भुवः स्वः चित्रगुप्त ! इहागच्छ इह तिष्ठ ॐ चित्रगुप्ताय नमः ।

शुक्लपुष्पतण्डुलैः सर्वाः प्रत्यधिदेवताः आवाह्य स्थापयित्वा पूजयेत्—
अग्निम्—सूर्यस्य वामपार्श्वे ॐ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे ॥
देवा२॥ऽआसादयादिह ॥
ॐ भूर्भुवः स्वः अग्ने ! इहागच्छ इह तिष्ठ ॐ अग्नये नमः ॥१॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आपः—सोमस्य वामपार्श्वे ॐ अप्स्वग्ने सधिष्टव सौषधीरनुरुध्यसे ॥
गर्भे सञ्जायसे पुनः ॥
ॐ भूर्भुवः स्वः आप ! इहागच्छत इह तिष्ठत ॐ अद्भ्यो नमः ॥२॥
भूमिम्—भौमस्य वामपार्श्वे ॐ स्योना पृथिविनो भवान्नृक्षरा निवेशनी ॥
यच्छानः शर्म्मसप्रथाः ॥
ॐ भूर्भुवः स्वः भूमे ! इहागच्छ इह तिष्ठ ॐ भूम्यै नमः ॥३॥
विष्णुम्—बुधस्य वामपार्श्वे ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥
समूढमस्यपाᳪं सुरे स्वाहा ॥
ॐ भूर्भुवः स्वः विष्णो ! इहागच्छ इह तिष्ठ ॐ विष्णवे नमः ॥४॥
इन्द्रं गुरोर्वामपार्श्वे ॐ इन्द्रऽआसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुरऽएतु सोमः ।
देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्रम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ भूर्भुवः स्वः इन्द्रेहागच्छ इह तिष्ठ ॐ इन्द्राय नमः ॥५॥

इन्द्राणीम्—शुक्रस्य वामपार्श्वे ॐ अदित्यैरास्नासीन्द्राण्याऽउष्णीषः ॥
पूषासिघर्मायदीष्व ॥

ॐ भूर्भुवः स्वः इन्द्राणि! इहागच्छ इह तिष्ठ ॐ इन्द्राण्यै नमः ॥६॥

प्रजापतिम्—शनेर्वामपार्श्वे ॐ प्रजापतेनत्वदेतान्न्यन्योविश्वारूपाणिपरिता
बभूव ॥ यत्कामास्ते जुहुमस्तन्नोऽ अस्तुवयᳬस्यामपतयोरयीणाम् ॥

ॐ भूर्भुवः स्वः प्रजापते! इहागच्छेह तिष्ठ ॐ प्रजापतये नमः॥७॥

सर्पान्—राहोर्वामपार्श्वे ॐ नमोस्तुसर्पेभ्योयेकेचपृथिवीमनु ॥
येऽअन्तरिक्षेयेदिवितेभ्यः सर्पेभ्यो नमः ॥

ॐ भूर्भुवः स्वः सर्पा! इहागच्छत इह तिष्ठत ॐ सर्पेभ्यो नमः॥८॥

ब्रह्माणम्—केतूनां वामपार्श्वे ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचो

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वेनऽआवः । सबुध्न्याऽउपमाऽअस्यविष्ठाःसतश्चयोनिमसतश्चविवः

ॐ भूर्भुवः स्वः ब्रह्मन् ! इहागच्छेह तिष्ठ ब्रह्मणे नमः ॥६॥

ततः शुक्लपुष्पतण्डुलैर्विनायकादि पञ्चदेवताः आवाह्य स्थापयित्वा पूजयेत्—

विनायकम्—राहोरुत्तरभागे ॐ गणानान्त्वागणपतिꣳ हवामहेप्रियाणान्त्वा

प्रियपतिꣳ हवामहे निधीनान्त्वानिधिपतिꣳ हवामहे व्वसोमम ॥

आहमजानिगर्भधमात्त्वमजासिगर्भधम् ॥

ॐ भूर्भुवः स्वः विनायक! इहागच्छेह तिष्ठ ॐ विनायकाय नमः ॥

दुर्गाम्—शनेरुत्तरभागे ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन ॥

ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥

ॐ भूर्भुवः स्वः दुर्गे ! इहागच्छेह तिष्ठ ॐ दुर्गायै नमः ॥२॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वायुम्—सूर्यस्योत्तरभागे ॐ वायोषेतेसहस्त्रिण ेरथासस्तेभिरागहि ॥
निर्युत्वान्त्सोमपीतये ॥
ॐ भूर्भुवः स्वः वायो ! इहागच्छेह तिष्ठ ॐ वायवे नमः ॥३॥
आकाशम्—राहोर्दक्षिणभागे ॐ घृतङ्घृतपावानः पिबतव्वसांवसापावानः
पिबतान्तारिक्षस्यहविरसिस्वाहा ॥ दिशः प्रदिशऽउद्दिशोविदिशऽ
उद्दि-शोदिग्भ्यः स्वाहा ॥
ॐ भूर्भुवः स्वः आकाश ! इहागच्छेह तिष्ठ ॐ आकाशाय नमः ॥४॥
अश्विनीकुमारौ—केतूनां दक्षिणभागे ॐ याबाङ्कशामधुमत्यश्विनासूनृतावती॥
तयायज्ञमिमिक्षतम् ॥ उपयामगृहीतोस्यश्विभ्यान्त्वैषतेयो निर्म्मा-
दुध्वीभ्यान्त्वा ॥
ॐ भूर्भुवः स्वः अश्विनौ ! इहागच्छतामिहतिष्ठताम् ॐ अश्विनीभ्यां नमः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ततः पूर्वादिदिक्षु दिक्पालान् आवाह्य स्थापयित्वा पूजयेत् ॥

इन्द्रम्, पूर्वे—ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवेसुहवꣳ शूरमिन्द्रम् ॥
ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳ स्वस्तिनोमघवाधात्विन्द्रः ॥
ॐ भूर्भुवः स्वः इन्द्र ! इहागच्छेह तिष्ठ ॐ इन्द्राय नमः ॥१॥

अग्निम्, आग्नेये—ॐ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे ॥
देवाँ२॥ऽआसादयादिह ॥
ॐ भूर्भुवःस्वः अग्ने ! इहागच्छेहतिष्ठ ॐ अग्नये नमः ॥२॥

यमम्, दक्षिणे—ॐ यमायत्वामखायत्वासूर्यस्यत्वातपसे॥ देवस्त्वासविता
मध्वानक्तुपृथिव्याःसꣳस्पृशस्पाहि ॥ अर्चिरसिशोचिरसितपोसि॥
ॐभूर्भुवः स्वः यम इहागच्छेह तिष्ठ ॐ यमाय नमः ॥३॥

निर्ऋतिम्, निर्ऋतिभागे—ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तस्करस्य ॥ अन्यमस्मदिच्छसात ऽइत्यादेविनिर्ऋतेतुभ्यमस्तु ॥
ॐ भूर्भुवः स्वः निर्ऋते इहागच्छेह तिष्ठ ॐ निर्ऋतये नमः ॥४॥
वरुणम्, पश्चिमे—ॐ वरुणस्योत्तम्भनमसिवरुणस्यस्कम्भसर्जनीस्थोवरुण-
स्यऽऋतसदन्यसिवरुणस्यऽऋतसदनमसिवरुणस्यऽऋतसदनमासीद ॥
ॐ भूर्भुवः स्वः वरुण ! इहागच्छेह तिष्ठ ॐ वरुणाय नमः ॥५॥
वायुम्, वायव्ये—ॐ वातोवामनोवागन्धर्वाः सप्तविꣳ शतिः ॥
तेऽ अग्रेश्वमयुञ्जँस्तेऽअस्मिञ्जवमादधुः ॥
ॐ भूर्भुवः स्वः वायो ! इहागच्छेह तिष्ठ ॐ वायवे नमः ॥६॥
सोमम्, उत्तरे—ॐ सोमोधेनुꣳ सोमोऽअर्वन्तमाशुꣳ सोमोवीरङ्कर्म्मण्यन्द-
दाति ॥ सादन्यंविदथ्यꣳ सभेयम्पितृश्रवणंयोददाशमस्मै ॥
ॐ भूर्भुवः स्वः सोम इहागच्छ इह तिष्ठ ॐ सोमाय नमः ॥७॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ईश्वरम्, ईशाने—ॐ वयꣳसोमव्रतेतवमनस्तनूषुबिभ्रतः ॥
प्रजावन्तः सचेमहि ॥
ॐ भूर्भुवः स्वः ईशान ! इहागच्छेह तिष्ठ ॐ ईशानाय नमः ॥८॥
ब्रह्माणम्, पूर्वैशानमध्ये–ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोवे-
नऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥
ॐ भूर्भुवः स्वः ब्रह्मन् ! इहागच्छ इह तिष्ठ ॐ ब्रह्मणे नमः ॥९॥
अनन्तम्, पश्चिमनिर्ऋतिमध्ये—ॐ नमोस्तु सर्प्पेभ्योयेकेचपृथिवीमनु ॥
येऽअन्तरिक्षेयेदिवितेभ्यः सर्प्पेभ्यो नमः ॥
ॐ भूर्भुवः स्वः अनन्त ! इहागच्छेह तिष्ठ ॐ अनन्ताय नमः ॥१०॥
[1]वसून्, इन्द्राग्निमध्ये–ॐ वसुभ्यस्त्वारुद्रेभ्यस्त्वादित्येभ्यस्त्वासञ्जानाथा-

---

१ ध्रुवोऽध्वरस्तथा सोम आपश्चैवानिलोऽनलः । प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

न्द्यावापृथिवीमित्रावरुणौत्वाव्वृष्ट्यावताम् ॥ व्यन्तुवयोक्तᳫं रिहाणा मरुताम्पृषतीर्गच्छवशापृश्निर्भूत्वादिवङ्गच्छततोनोव्वृष्टिमावह ॥ चक्षुष्पाऽअग्नेसिचक्षुर्म्मेपाहि ॥

ॐ भूर्भुवः स्वः वसव! इहागच्छत इह तिष्ठत ॐ अष्टवसुभ्यो नमः ।

[१]आदित्यान्, ईशानमध्ये–ॐ यज्ञोदेवानाम्प्रत्येतिसुम्नमादित्यासोभवताम्-डयन्तः ॥ आवोर्वाचीसुमतिर्व्ववृत्त्यादᳫं होश्चिद्यावरिवोवित्तरासदा-दित्येभ्यस्त्वा ॥

ॐ भूर्भुवः स्वः आदित्या! इहागच्छत इह तिष्ठत ॐ धात्रादि द्वादशादित्येभ्यो नमः ॥२॥

---

१ धाताऽर्यमा च मित्रश्च वरुणेशौ भगस्तथा । इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः ॥
ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः । इत्येते द्वादशादित्या नामभिः परिकीर्तिताः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

[१]रुद्रान्, अग्नियममध्ये—ॐ यऽएतावन्तश्च भूयाᳬंसश्च दिशो रुद्रा वितस्थिरे।
तेषाᳬंसहस्रयोजनेवधन्न्वानितन्मसि ॥
ॐ भूर्भुवः स्वः रुद्रा! इहागच्छत इह तिष्ठत ॐ वीरभद्राद्येका-
दशरुद्रेभ्यो नमः ॥३॥

[२]गौरीः, यमनिऋतिमध्ये—ॐ गौरीर्मिमायसलिलानितक्षत्येकपदीद्विपदीत्रिप-
दीसाचतुष्पदी ॥ अष्टापदीनवपदीबभूवुषिसहस्राक्षरीपरमेव्योमन् ॥
ॐ भूर्भुवः स्वः गौर्यः! इहागच्छत इह तिष्ठत ॐ गौर्यादिषोडश-
मातृभ्यो नमः ॥४॥

---

१ वीरभद्रश्च शम्भुश्च गिरीशश्च महायशाः। अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ॥
भुवनाधीश्वरश्चैव कपाली च विशाम्पतिः। स्थाणुर्भवश्च भगवान् रुद्रा एकादश स्मृताः ॥

२ गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥
धृतिस्तुष्टिस्तथा पुष्टिरात्मनः कुलदेवता ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गणपतिम्, निर्ऋतिवरुणयोर्मध्ये—ॐ गणनान्त्वागणपतिᳯ हवामहेप्रिया-
णान्त्वाप्रियपतिᳯ हवामहेनिधीनान्त्वानिधिपतिᳯ हवामहेवसोमम॥
आहमजानिगर्ब्भधमात्वमजासिगर्ब्भधम् ॥
ॐ भूर्भुवः स्वः गणपते! इहागच्छेह तिष्ठ ॐ गणपतये नमः ॥५॥
[१]मरुतः, वायुसोममध्ये—ॐ मरुतोयस्यहिक्षयेपाथादिवोविमहसः॥
ससुगोपातमोजनः ॥
ॐ भूर्भुवः स्वः मरुत ! इहागच्छत इह तिष्ठत ॐ आवहादि
सप्तमरुद्भ्यो नमः । ६॥
ततो वेद्यामेव यथावकाशं ब्रह्मादीन् पञ्च आवाह्य स्थापयित्वा पूजयेत्—
ब्रह्माणम्—ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसोमतः॥ सुरुचोवेनऽआवः ॥

आवहः प्रवहश्चैव उद्वहः संवहस्तथा । वहः परावहश्चैव तथा परिवहोऽनिलः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ भूर्भुवः स्वः ब्रह्मन्! इहागच्छेह तिष्ठ ॐ ब्रह्मणे नमः ॥१॥

विष्णुम्–ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्। समूढमस्यपाᳫं सुरेस्वाहा॥

ॐ भूर्भुवः स्वः विष्णो! इहागच्छेह तिष्ठ ॐ विष्णवे नमः॥२॥

रुद्रम्–ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः॥
मानोव्वीरान्नुद्रमामिनोवधीर्हविष्मन्तः सदमित्त्वाहवामहे ॥

ॐ भूर्भुवः स्वः रुद्र! इहागच्छेह तिष्ठ ॐ रुद्राय नमः ॥ ३ ॥

अग्निम्–ॐ अग्निर्रास्मिजन्मनाजातवेदाघृतम्मेचक्षुरमृतम्मऽआसन्॥
अर्कस्त्रिधातूरजसोविमानोजस्रोघर्मोहविरस्मिनाम ॥

ॐ भूर्भुवः स्वः अर्क! इहागच्छ इह तिष्ठ ॐ अर्काय नमः ॥४॥

वनस्पतिम्–ॐ व्वनस्पतेवीड्वङ्गोहिभूयाऽअस्मत्सखाप्रतरणः सुवीरः॥
गोभिः सन्नद्धोऽअसिवीडयस्वास्थातातेजयतुजेत्वानि ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ भूर्भुवः स्वः वनस्पते! इहागच्छेह तिष्ठ ॐ वनस्पतये नमः॥५॥

ततो द्व्युत्तरशतं देवता स्थापयित्वा सम्पूज्य वेदिपश्चिमभागे भूमावेव ग्रह-देवताबलिः। नवग्रहेभ्यः—

सूर्याय—ॐ आकृष्णेन० (पृ० ४१) गुडौदनाभावे एष दध्यक्षतबलिर्नमः
सोमाय—ॐ इमन्देवा० („ ४२) घृतपायसाभावे „
भौमाय—ॐ अग्निर्मूर्द्धा० („ ४३) मसूरान्नाभावे „
बुधाय—ॐ उद्बुध्यस्व० („ ४३) दुग्धौदनाभावे „
बृहस्पतये—ॐ बृहस्पतेऽ अति० („ ४४) दध्यौदनाभावे „
शुक्राय—ॐ अन्नात्परिस्रुतः० („ ४५) घृतौदनाभावे „
शनैश्चराय—ॐ शन्नोदेवी० („ ४५) कृसरान्नाभावे „
राहवे—ॐ कयानश्चित्र० („ ४६) छागमांसाभावे „

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

केतुभ्यः—ॐ केतुङ्कृण्वन्० (पृ०४७) चित्रौदनाभावे एष दध्यक्षतबलिर्नमः

अधिदेवताभ्यः—

ईश्वराय—ॐ त्र्यम्बकं०	(„ ४७)	घृतपायसाभावे	„
उमायै—ॐ श्रीश्चते०	(„ ४८)	„	„
स्कन्दाय—ॐ यदक्रन्दः०	(„ ४८)	„	„
विष्णवे—ॐ विष्णोरराट०	(„ ४८)	„	„
ब्रह्मणे—ॐ आब्रह्मन्०	(„ ४९)	„	„
इन्द्राय—ॐ सजोषाऽइन्द्र०	(„ ५०)	„	„

यमाय—ॐ असियमोऽअस्यादित्योऽअर्व्वन्नसित्रितोगुह्येनव्व्रतेन ॥
असिसोमेनसमयाविपृक्तऽआहुस्तेत्त्रीणिदिविबन्धनानि ॥
घृतपायसाभावे एष दध्यक्षतबलिर्नमः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कालाय—ॐ काषिँरसिसमुद्रस्यत्वाक्षित्याऽउन्नयामि ॥ समापोऽअद्भिर-
ग्मतसमोषधीभिरोषधीः ॥ घृतपायसाभावे एष दध्यक्षतबलिर्नमः

चित्रगुप्ताय—ॐ चित्रावसो० (पृ० ५१) „ „

प्रत्यधिदेवताभ्यः—

अग्नये---ॐ अग्निन्दूतं० („ ५१) „ „

अद्भ्यः-ॐ अप्स्वन्तरमृतमप्सुभेषजमपामुतप्रशस्तिष्वश्वा भवतवाजिनः॥
देवीरापोयोवऽऊर्म्मिः प्रतूर्त्तिः ककुन्मान्वाजसास्तेनायंव्वाजꣳ सेत् ॥
घृतपायसाभावे एष दध्यक्षतबलिर्नमः

पृथिव्यै---ॐ स्योनापृथिवि० („ ५२) „ „

विष्णवे---ॐ इदंविष्णु० („ ५२) „ „

इन्द्राय---ॐ त्रातारमिन्द्रम्० („ ५६) „ „

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इन्द्राण्यै---ॐ नियुत्वान्वायवागह्ययꣳ शुक्रोऽअयामिते ॥
गन्तासिसुन्वतोगृहम् ॥ घृतपायसाभावे एष दध्यक्षतबलिर्नमः

प्रजापतये---ॐ प्रजापतेनत्व० (पृ० ५३) ,, ,,
सर्पेभ्यः---ॐ नमोस्तुसर्पेभ्यो० (,, ५३) ,, ,,
ब्रह्मणे---ॐ ब्रह्मयज्ञानम्० (,, ५३) ,, ,,

विनायकादिपञ्चकेभ्यः—

विनायकाय---ॐ गणानान्त्वा० (,, ५४) ,, ,,
दुर्गायै---ॐ अम्बेऽअम्बिके० (,, ५४) ,, ,,
वायवे---ॐ वातोवा० (,, ५७) ,, ,,
आकाशाय---ॐ घृतंघृतपावा० (,, ५५) ,, ,,
अश्विनीभ्याम् ॐ याबाङ्कशा० (,, ५५) ,, ,,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दिक्पालेभ्यः---

इन्द्राय—ॐ इन्द्रस्तु महसा दीप्तः सर्वदेवाधिपो महान् । वज्रहस्तो महासत्वस्तस्मै नित्यं नमो नमः ॥
माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥१॥

अग्नये—ॐ आग्नेयः पुरुषो रक्तः सर्वदेवमयोऽव्ययः । धूमकेतुरजोध्यक्षस्तस्मै नित्यं नमो नमः ॥
माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥२॥

यमाय—ॐ यमश्चोत्पलपत्राभः किरीटी दण्डधृक्सदा । धर्मसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः ॥
माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥३॥

निर्ऋतये-ॐ निर्ऋतिस्तु पुमान् कृष्ण सर्वरक्षाधिपो महान् । खड्गहस्तो महासत्वस्तस्मै नित्यं नमो नमः
माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥४॥

वरुणाय—ॐ वरुणः सर्वदा विष्णुः पुरुषो निम्नगाधिपः । पाशहस्तो महासत्वस्तस्मै नित्यं नमो नमः ॥
माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥५॥

वायवे—ॐ वायुस्तु सर्ववर्णोऽयं सर्वगन्धवहः शुचिः । पुरुषो ध्वजहस्तश्च तस्मै नित्यं नमो नमः ॥
माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥६॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सोमाय–ॐ गौरो यस्तु पुमान् सौम्यः सर्वौषधिसमन्वितः। नक्षत्राधिपतिः सोमस्तस्मै नित्यं नमो नमः
माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥७॥
ईशानाय–ॐ ईशानः पुरुषः शुक्लः सर्वविद्याधिपो महान्। शूलहस्तो विरूपाक्षस्तस्मै नित्यं नमो नमः ॥
माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥८॥
ब्रह्मणे–ॐ पद्मयोनिश्चतुर्मूर्तिर्वेदावासः पितामहः। यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नमः ॥
माषभक्ताभावे एष दध्यक्षतबलिर्नमः ॥९॥
अनन्ताय–ॐ योऽसावनन्तरूपेण ब्रह्माण्डं सचराचरम्। पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमो नमः ॥
माषभक्ताभावे एष दध्यक्षतबलिर्नमः ।१०॥
ध्रुवाद्यष्टवसुभ्यः–ॐ वसुभ्य० (पृ.५८) माषभक्ताभावे एष दध्यक्षतबलिर्नमः
धात्रादिद्वादशादित्येभ्यः–ॐ यज्ञोदेवानां० (पृ. ५९) " "
वीरभद्राद्येकादशरुद्रेभ्यः–ॐ यऽएताव० (पृ. ६०) " "
गौर्यादिषोडशमातृभ्यः–ॐ गौरीर्मिमा० (पृ. ६०) " "

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आवहादिसप्तमरुद्भ्यः-ॐ मरुतो० (पृ. ६१) माषभक्ताभावे एष दध्यक्षत०
विनायकाय—ॐ गणानान्त्वा० (,, ६१) ,, ,,
ब्रह्मणे—ॐ ब्रह्मयज्ञानं० (,, ६१) ,, ,,
विष्णवे—ॐ इदं विष्णुः० (,, ६२) ,, ,,
रुद्राय—ॐ मानस्तोके० (,, ६२) ,, ,,
अर्काय—ॐ अग्निरश्मि० (,, ६२) ,, ,,
वनस्पतये—ॐ वनस्पतेवी० (,, ६२) ,, ,,

एवं फलादिभूरिभक्ष्याणि सूर्यादिद्वादशरश्मिदेवताभ्यो नमः। इति दद्यात् वेद्युपरि हस्तमात्रं फलपुष्पशोभितं विनानकं बृहस्पतिदैवतं सूर्यादि देवताभ्यो नमः इति सङ्कल्पं कुर्यात् ॥ एवं पूजां निर्वर्त्य अग्नेर्दक्षिणतः उपविश्य उत्तराभिमुखः कुश-यव-जलान्यादाय—ॐ अद्येत्यादि देश-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कालौ स्मृत्वा ग्रहशान्तिकर्मणि इदमाज्यादिहवनीयद्रव्यं पूर्वमाघा-
राज्यभागं प्रजापतीन्द्राग्निसोमदेवताभ्यः प्रधानभूतेभ्यः सूर्य-सोम-
भौम-बुध-बृहस्पति-शुक्र-शनैश्चर-राहु-केतूपग्रहेश्वरोमास्कन्दविष्णु
ब्रह्मेन्द्र-यम-काल-चित्रगुप्ताख्याधिदेवता अग्नि अप्-भूमि-विष्णु-इन्द्र-
इन्द्राणि-प्रजापति-सर्प-ब्रह्माख्याः प्रत्यधिदेवता विनायक-दुर्गा-
वायु-आकाश-अश्वाख्य लोकपालेन्द्र-अग्नि-यम-निर्ऋति-वरुण-वायु
सोमेशान-ब्रह्मानन्ताख्यदिक्पाल-ध्रुवाद्यष्टवसु-धात्रादिद्वादशादित्य
वीरभद्राद्येकादशरुद्र - गौर्यादिषोडशमातृ - आवहा दे सप्तमरुद्-
विनायक-ब्रह्म-विष्णु-रुद्रार्क-वनस्पतिदेवताभ्यः उत्तराङ्गं भूर्भुवः
स्वः अग्नि-वरुण-सवितृ-विष्णु-विश्वेदेवमरुत्स्वर्कप्रजापतिस्विष्टकृ-
द्देवेभ्यो मया त्यक्तम् ॥ सर्वदेवतोद्देशेन युगपद्द्रव्यत्यागः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रत्याहुतित्यागस्य कर्तुमशक्यत्वात् ॥ होमश्च प्रणवादि स्वाहान्तस्तत्तद्दैवत्यमन्त्रैर्ऋग्वेदश्छन्दोऽनुकीर्तनपूर्वकं नवग्रहाधिदेवता-पञ्चलोकपाल-दशदिक्पालाष्टवसु-द्वादशादित्यैकादशरुद्र-षोडशमातृ-सप्तमरुद्ब्रह्म-विष्णु-रुद्रार्क-वनस्पतीनां प्रत्येकमष्टोत्तरशतमष्टाविंशति द्वादशाष्टौ वाऽहुतयः ॥ इत्येकं कार्यम् ॥ वस्वादित्यरुद्रमातृमरुतां मन्त्रानुरोधेन समुदितमेव होमः प्रत्येकं मन्त्राभावात् ॥ ततः समुदितपक्षे एकपञ्चाशत् देवताः ॥ अष्टोत्तरशताहुतिषु पञ्चसहस्राणि पञ्चशतान्यष्टौ चाहुतयः ॥ ५५०८ ॥ अष्टाविंशत्याहुतिषु चतुर्दशशतान्यष्टाविंशतिश्चाहुतयः ॥ १४२८ ॥ द्वादशाहुतिषु षट्शतानि द्वादशश्चाहुतयः ॥ ६१२ ॥ अष्टाहुतिषु चतुःशतान्यष्टौ चाहुतयः ॥ ५०८ ॥ जापकसूक्तानि च जपेत्, गुरुः सर्वाध्यक्षस्तिष्ठेत् ॥ ततः समिद्धतमे निर्धूमे हुताशने दक्षिणजानु पातयित्वा होता आज्यपूर्ण-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्रुवेण प्रथमं मनसा॥ ॐ प्रजापतय इति प्रजापतिऋर्षिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता नवग्रहमखे आज्यहोमे विनियोगः॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम॥ इति प्राजापत्यमाघारं जुहुयात्॥ स्रुवस्थहुतशेषं प्रोक्षणीपात्रे निदध्यात्॥ ॐ इन्द्रायेति प्रजापति ऋषिस्त्रिष्टुप्छन्दः इन्द्रो देवता नवग्रहमखे आज्यहोमे विनियोगः॥ ॐ इन्द्राय स्वाहा इदमिन्द्राय०॥ इति द्वितीयमाघारमग्नेर्दक्षिणभागे जुहुयात्॥ ॐ अग्नय इति प्रजापतिऋर्षिस्त्रिष्टुप्छन्दोऽग्निर्देवता नवग्रहमखे आज्यहोमे विनियोगः॥ ॐ अग्नये स्वाहा इदमग्नये०॥ इत्याग्नेयमाज्यभागं जुहुयात्॥ ॐ सोमायेति प्रजापति ऋषिस्त्रिष्टुप्छन्दः सोमो देवता नवग्रहमखे आज्यहोमे विनियोगः ॐ सोमाय स्वाहा इदं सोमाय०॥ द्वितीयमाज्यभागमग्नेरुत्तरभागे जुहुयात्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रधानदेवताहोमः—

सूर्यस्य–ॐ आकृष्णेनेति हिरण्यस्तूप ऋषिस्त्रिष्टुप्छन्दः सविता देवता आदित्यप्रीतये कपिलाग्नौ आज्यहोमे ऽर्कसमिद्धोमे च विनियोगः ॥ ॐ आकृष्णेनरजसावर्तमानो० (पृष्ठ ४१) स्वाहा । इदं सूर्याय ॥१॥

सोमस्य—ॐ इमन्देवेति वरुण ऋषिः सोमो देवता यजुः सोमप्रीतये पिङ्गलाग्नौ आज्यहोमे पालाशसमिद्धोमे च विनियोगः ॥ ॐ इमन्देवाऽअसपत्नꣳ सुव० (पृष्ठ ४२) स्वाहा इदं सोमाय ॥ २ ॥

कुजस्य—ॐ अग्निर्मूर्द्धेति विरूपाक्ष ऋषिर्गायत्री छन्दोऽङ्गारको देवता कुजप्रीतये धूमकेत्वग्नौ आज्यहोमे खादिरसमिद्धोमे च विनियोगः ॥ ॐ अग्निर्म्मूर्द्धादिवः० (पृष्ठ ४३) स्वाहा इदं कुजाय ॥३॥

बुधस्य—ॐ उद्बुध्यस्वेति परमेष्ठी ऋषिर्बुधो देवता त्रिष्टुप्छन्दो बुध-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रीतये जाठराग्नौ आज्यहोमेऽपामार्गसमिद्धोमे च विनियोगः ॥
ॐ उद्बुध्यस्वाग्नेप्रतिजा० (पृष्ठ ४३) स्वाहा इदं बुधाय० ॥४॥
बृहस्पतेः—ॐ बृहस्पतेऽअतीति गृत्समदऋषिर्बृहस्पतिर्देवता त्रिष्टुप्-
छन्दो बृहस्पतिप्रीतये शिखिनामाग्नौ आज्यहोमे अश्वत्थसमिद्धोमे
च विनियोगः ॥ ॐ बृहस्पते० (पृ० ४४) इदं बृहस्पतये० ॥५॥
शुक्रस्य—ॐ अन्नात्परिस्रुत इति प्रजापत्यश्विसरस्वतीन्द्रा ऋषयः शुक्रो
देवता जगतीच्छन्दः शुक्रप्रीतये हाटकाग्नौ आज्यहोमे उदुम्बर-
समिद्धोमे च विनियोगः ॥ ॐ अन्नात्परिस्रुतोरसम्ब्रह्मणाव्यपिब
त्क्षत्रम्पयः सोमम्प्रजापतिः ॥० (पृष्ठ ४५) स्वाहा इदं शुक्राय ॥६॥
शनेः—शन्नोदेवीरिति दध्यङ्ङाथर्वण ऋषिः शनिर्देवता गायत्रीछन्दः
शनैश्चरप्रीतये महातेजोऽग्नौ आज्यहोमे शमिसमिद्धोमे च विनि-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

योगः ॥ ॐ शन्नोदेवी० (पृष्ठ ४५) स्वाहा इदं शनैश्चराय ॥७॥
राहोः—ॐ कयानश्चित्रेति वामदेव ऋषिः राहुर्देवता गायत्रीछन्दो राहुप्रीतये हुताशनाग्नौ आज्यहोमे दूर्वासमिद्धोमे च विनियोगः ॥ ॐ कयानश्चित्रऽआभुवदूतीसदा० (पृष्ठ ४६) स्वाहा इदं राहवे ॥८॥
केतून्—ॐ केतुंकृण्वन्निति मधुछन्द ऋषिः केतवो देवताः केतुप्रीतये रोहिताग्नौ आज्यहोमे कुशसमिद्धोमे च विनियोगः ॥ ॐ केतुं कृण्वन्नकेतवे पेशोमर्याऽअपे० (पृष्ठ ४७) स्वाहा इदं केतुभ्यः ॥९॥
अधिदेवतानाम् ॥ ईश्वरस्य—ॐ त्र्यम्बकमिति वसिष्ठ ऋषिः रुद्रो देवता अनुष्टुपूछन्दस्त्र्यम्बकप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ त्र्यम्बकं० (पृष्ठ ४७) स्वाहा इदं त्र्यम्बकाय ॥१॥ अत्र प्रणीतोदकस्पर्शः
उमायै—ॐ श्रीश्चतेत्युत्तरनारायण ऋषिः उमादेवता त्रिष्टुपूछन्दः उमा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ श्रीश्चतेलक्ष्मी श्चपत्न्यावहोरात्रेपार्श्वेनक्ष० (पृष्ठ ४८) स्वाहा इदं उमायै ॥ २ ॥

स्कन्दस्य—ॐ यदक्रन्द इति भास्करजमदग्निदीर्घतमस ऋषयः स्कन्दो देवता त्रिष्टुप्छन्दः स्कन्दप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ यदक्रन्दः० (पृष्ठ ४८) स्वाहा इदं स्कन्दाय ॥ ३ ॥

विष्णवे—ॐ विष्णोरराटमिति उतथ्यऋषिर्विष्णुर्देवता यजुर्विष्णुप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ विष्णोरराटमसिविष्णोः श्नप्त्रेस्थोविष्णोः स्यूरसि० (पृष्ठ ४८) स्वाहा इदं विष्णवे ॥ ४ ॥

ब्रह्मणे—ॐ आब्रह्मन्निति प्रजापतिऋषिर्ब्रह्मादेवता ब्रह्मप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यःशूरऽइष० (पृष्ठ ४९) स्वाहा इदं ब्रह्मणे ॥ ५ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इन्द्रस्य—ॐ सजोषाऽइन्द्रेति विश्वामित्र ऋषिरिन्द्रो देवता इन्द्रप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ सजोषाऽइन्द्रसगणोमरुद्भिः सोमम्पिबवृत्रहा० (पृष्ठ ५०) स्वाहा इदं इन्द्राय ॥६॥

यमस्य—ॐ असियम इति भार्गव-जमदग्नि-दीर्घतमस ऋषयो यमो देवता त्रिष्टुप्छन्दो यम प्रीतये आज्यहोमे चरुहोमे च विनियोगः । ॐ असियमः (६४) स्वाहा इदं यमाय० ॥ अत्र प्रणीतोदकस्पर्शः॥७।

कालस्य—ॐ कार्षिरसीति दध्यङ्ङाथर्वण ऋषिः कालो देवता अनुष्टुप् छन्दः कालप्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ कार्षि० (पृ० ६५) कालाय स्वाहा इदं कालाय ॥ अत्र प्रणीतोदकस्पर्शः ॥८॥

चित्रगुप्तस्य—ॐ चित्रावसोऽस्वस्तिति देवा ऋषयश्चित्रगुप्तो देवता जगती छन्दश्चित्रगुप्तप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ चित्रावसो

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्व० (पृ० ५१) स्वाहा इदं चित्रगुप्ताय ॥ अत्र प्रणीतोदकस्पर्शः ॥९॥

प्रत्यधिदेवतानाम्—

अग्नये—ॐ अग्निन्दूतमिति विरूपाक्ष ऋषिरग्निर्देवता गायत्री छन्दोऽग्निप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ अग्निन्दूतम् पुरोदधेहव्यवाहमुपब्रुवे ॥० (पृ० ५१) स्वाहा इदमग्नये ॥१॥

अद्भ्यः—ॐ अप्स्वन्तरिति बृहस्पति ऋषिरापो देवता पुरउष्णिक्छन्दो अपां प्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ अप्स्वन्तरमृतमप्सुभेषजम्० (पृ० ६५) स्वाहा इदमद्भ्यः ॥२॥

पृथिव्यै—ॐ स्योना पृथिवीति मेधातिथि ऋषिः पृथिवी देवता गायत्रीछन्दः पृथिवीप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ स्योना पृथिवीनोभवानृक्षरा० (पृ० ५२) स्वाहा इदं पृथिव्यै ॥३॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विष्णवे—ॐ इदं विष्णुरिति मेधातिथि ऋषिर्विष्णुर्देवता गायत्रीछन्दो विष्णुप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ इदंविष्णु र्विचक्रमेत्रेधानिदधेपदम् ॥ स० (पृ० ५२) स्वाहा इदं विष्णवे ॥४॥

इन्द्राय—ॐ त्रातारमिति गार्ग्य ऋषिरिन्द्रो देवता त्रिष्टुप्छन्दः इन्द्र प्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ त्रातारमिन्द्रमवि तारमिन्द्रꣳ हवेहवेसुहवꣳशूर० (पृ० ५६) स्वाहा इदमिन्द्राय ॥५॥

इन्द्राण्यै—ॐ अदित्यैरास्नेति दध्यङ्ङाथर्वण ऋषिरिन्द्राणी देवता यजुः शचीप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ अदित्यै-रास्नासीन्द्राण्याऽउष्णीषः ॥० (पृ० ५३) स्वाहा इदं शच्यै ॥६॥

प्रजापतये—ॐ प्रजापतेनेति वरुण ऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्दः प्रजापतिप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ प्रजापते

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नत्वदेतान्न्यन्योविश्वा० (पृ० ५३) स्वाहा इदं प्रजापतये ॥७॥

सर्पेभ्यः—ॐ नमोऽस्तु सर्पेभ्य इति देवा ऋषयः सर्पा देवता अनुष्टुप् छन्दः सर्पप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ नमोस्तु सर्पेभ्योयेकेचपृथिवीमनु० ॥ (पृ० ५३) स्वाहा इदं सर्पेभ्यः ॥८॥

ब्रह्मणे—ॐ ब्रह्मयज्ञानमिति प्रजापति ऋषिर्ब्रह्मादेवता त्रिष्टुप्छन्दो ब्रह्मप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ ब्रह्मयज्ञानम् प्रथमम्पुरस्ताद्विसीमतः ॥० (पृ० ५३) स्वाहा इदं ब्रह्मणे ॥९॥

विनायकादिपञ्चानाम्—

विनायकाय—ॐ गणानान्त्वेति प्रजापतिऋषिर्गणपतिर्देवता यजुर्विनायकप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ गणानान्त्वागणपतिꣳ हवामहेप्रियाणान्त्वा० (पृ०५४) स्वाहा इदं विनायकाय ॥१॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दुर्गायै-ॐ अम्बेऽअम्बिकेति प्रजापतिऋर्षिर्दुर्गा देवता अनुष्टुप्छन्दो दुर्गा प्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ अम्बेऽअम्बिके-म्बालिकेनमानयतिकश्चन ॥ सस०(५४) स्वाहा इदं दुर्गायै० ॥२॥

वायवे-ॐ वातोवेति गन्धर्वा ऋषयो वातो देवता उष्णिक्छन्दो वायुप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ वातोवामनोवागन्धर्वाः सप्तविꣳशतिः ॥ तेऽअग्रे० (५७) स्वाहा इदं वायवे ॥३॥

आकाशाय-ॐ ऊर्ध्वाऽअस्येति प्रजापति ऋषिराकाशो देवता उष्णिक्छन्द आकाशप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ ऊर्ध्वाऽअ-स्यसमिधोभवन्त्यूर्ध्वाशुक्रशोचीꣳष्यग्नेः ॥ द्युमत्तमासुप्रतीकस्य सूनोः ॥ स्वाहा इदमाकाशाय ॥४॥

अश्विनीभ्याम्-ॐ अश्विनोभैंषज्येति अश्विनौ ऋषी अश्विनौ देवते यजु-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रश्विप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ अश्विनोर्भैष-ज्येनतेजसेब्रह्मवर्चसायाभिषिञ्चामिसरस्वत्यै भैषज्येनवीर्यायान्नाद्या-याभिषिञ्चामीन्द्रस्येन्द्रियेणबलायश्रियैयशसेऽभिषिञ्चामि ॥ स्वाहा इदमश्विभ्याम् ॥८॥

दिक्पालानाम्—

इन्द्राय—ॐ त्रातारमिन्द्रमिति गार्ग्य ऋषिरिन्द्रो देवता त्रिष्टुपूछन्द इन्द्र-प्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ त्रातारमिन्द्रमवि-तारमिन्द्रꣳहवेहवेसुहवꣳ सूर० ॥ (५६) स्वाहा इदमिन्द्राय ॥१॥

अग्नये—ॐ अग्निन्दूतमिति विरूपाक्ष ऋषिरग्निर्देवता गायत्रीछन्दोऽग्नि प्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ अग्निन्दूतम्पुरो-दधेहव्यवाहमुपब्रुवे ॥ देवाँ२॥ऽआ०॥ (५६) स्वाहा इदमग्नये ॥२॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यमाय—ॐ असियम इति भार्गव-जमदग्नि-दीर्घतमस ऋषयो यमो देवता त्रिष्टुप्छन्दो यमप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॐ असियम०(६४)। स्वाहा इदं यमाय॥ अत्र प्रणीतोदकस्पर्शः ॥३॥

निर्ऋतये—ॐ एषते निर्ऋत इति वरुण ऋषिर्निर्ऋतिर्देवता यजुर्निर्ऋति प्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ एषतेनिर्ऋतेभाग-स्तंजुषस्व स्वाहाग्निनेत्रेभ्योदेवेभ्यः पुरः सद्भ्यः स्वाहायमनेत्रेभ्यो दे-वेभ्यो दक्षिणासद्भ्यः स्वाहा विश्वदेवनेत्रेभ्योदेवेभ्यः पश्चात् सद्भ्यः स्वाहामित्रावरुणनेत्रेभ्योवामरुन्नेत्रेभ्योवामदेवेभ्यऽउत्तरासद्भ्यःस्वा हासोमनेत्रेभ्यो देवेभ्यऽउपरिसद्भ्यो दुवस्वद्भ्यः स्वाहा ॥ स्वाहा इदं निर्ऋतये ॥ अत्र प्रणीतोदकस्पर्शः ॥४॥

वरुणाय—ॐ इमम्मे इति शुनःशेफ ऋषिर्वरुणो देवता गायत्री छन्दो

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वरुणप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ इमम्मेवरुण श्रुधीहवमद्याचमृडय । त्वामवस्युराचके ॥ स्वाहा इदं वरुणाय ॥५॥
वायवे—ॐ वातोवेति गन्धर्वा ऋषयो वायुर्देवता उष्णिक्छन्दो वायुप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ वातोवामनोवागन्धर्वः सप्तवि ꣳ शति ॥ तेऽग्र० (५७) स्वाहा इदं वायवे ॥६॥
सोमाय—ॐ वयꣳसोमेति बन्धुऋषिः सोमो देवता गायत्रीछन्दः सोमप्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ व्वयꣳसोमव्रतेतव मनस्तनूषुबिभ्रतः । प्रजावन्तःसचेमहि ॥ स्वाहा इदं सोमाय ॥७॥
ईशानाय—ॐ तमीशानमिति गौतमऋषिरीशानो देवता जगतीछन्दः ईशानप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहूमहेव्वयम् ॥ पूषानोयथाव्वे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दसामसद्वृधेरक्षितापायुरदब्धः स्वस्तये ॥ स्वाहा इदमीशानाय ॥८॥ अत्र प्रणीतोदकस्पर्शः ॥

अनन्ताय—ॐ नमोस्तु सर्पेभ्य इति देवा ऋषयोऽनन्तो देवताऽनुष्टुप् छन्दोऽनन्तप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ नमोस्तु सर्पेभ्योयेकेचपृथिवीमनु० ॥ (५३) स्वाहा इदमनन्ताय ॥१०॥

ब्रह्मणे—ॐ ब्रह्मयज्ञानमिति प्रजापतिऋषिर्ब्रह्मा देवता त्रिष्टुप्छन्दो ब्रह्माप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विशीमतः सुरुचोव्वेनऽ० (५३) ॥ स्वाहा इदं ब्रह्मणे ॥९॥

वस्वादीनाम्—

वसुभ्यः—ॐ सुगाव इति देवता ऋषयो वसवो देवतास्त्रिष्टुपछन्दः वसुप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ सुगावोदेवाः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सद्नाऽअकर्मंषऽआजग्मेद७ंमवनंजुषाणाः ॥ भरमाणावहमानाह-
वीꣳष्यस्मेधत्तवसवोवसूनिस्वाहा ॥ स्वाहा इदं वसुभ्यः ॥ १ ॥
आदित्येभ्यः—ॐ यज्ञोदेवानामिति कुत्सऋषिरादित्यो देवतास्त्रिष्टुप्छन्द
आदित्यप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ यज्ञोदे-
वानाम्प्रत्येतिसुम्नमादि० (५९)॥ स्वाहा इदं द्वादशादित्येभ्यः ॥२॥
रुद्रेभ्यः—ॐ यऽएतावन्त इति परमेष्ठी ऋषि रुद्रोदेवता अनुष्टुप्छन्दो
रुद्रप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ यऽएतावन्तश्च
भूया७ंशश्च० (६०)॥ स्वाहा इदं रुद्रेभ्यः ॥३॥ अत्र प्रणीतोदकस्पर्शः ॥
गौरीभ्यः—ॐ गौरीर्मिमा० इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो मातरो देवता
गौर्यादि मातृदेवताप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥
ॐ गौरीर्मिमासलि० (६०)॥ स्वाहा इदं गौर्यादिषोडशमातृभ्यः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गणपतये—ॐ गणानान्त्वेति प्रजापतिर्ऋषिर्गणपतिर्देवता यजुर्गणपति प्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ गणनान्त्वागण-पतिᳫ हवामहे प्रियाणान्त्वा० (६१) ॥ स्वाहा इदं गणपतये ॥

मरुद्भ्यः—मरुतोयस्य इति गौतमऋषिर्मरुतो देवता गायत्रीछन्दो मरुतां प्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ मरुतोयस्यहिक्षये पाथादिवोविमहसः ॥ ससुगो०(६१) स्वाहा इदं मरुद्भ्यः ॥ ४ ॥

ब्रह्मणे—ॐ आब्रह्मन्निति प्रजापतिऋषिर्ब्रह्मा देवता यजुर्ब्रह्मप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्यःशूरऽइ० (४९) ॥ स्वाहा इदं ब्रह्मणे ॥५॥

विष्णवे—ॐ इदं विष्णुरिति मेधातिथि ऋषिर्विष्णुर्देवता गायत्रीछन्दो विष्णुप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ इदंविष्णु-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विंचक्रमेत्रेधानिदधेपदम् ॥० (५२) ॥ स्वाहा इदं विष्णवे ॥ ६ ॥
रुद्राय–ॐ मानस्तोक इति कुत्सऋषि रुद्रोदेवता गायत्रीछन्दो रुद्रप्रीतये आज्यहोमे चरुहोमे च विनियोगः ॥ ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषु०(६२)॥ स्वाहा इदं रुद्राय॥ ७॥ अत्र प्रणीतोदकस्पर्शः ॥
अर्काय—ॐ चित्रन्देवानामिति कुत्सऋषिः सूर्योदेवता अर्कप्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीऽअन्तरिक्षᳬसूर्यऽआत्माजगतस्तस्थुषश्च ॥ स्वाहा इदमर्काय ॥ ८ ॥
वनस्पतये–ॐ अयᳬहीति प्रजापतिऋषिर्वनस्पतिर्देवता यजुर्वनस्पति प्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ अयᳬहित्वास्वधितिस्तेतिजानः प्रणिनायमहतेसौभगाय॥ अतस्त्वन्देववनस्पतेशत

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वल्शा॥ विवय ॐ हहेम ॥ स्वाहा इदं वनस्पतये ॥६॥

प्रधानदेवता जपसूक्तानि—

सूर्यस्य—ॐ विभ्राडिति सप्तदशार्चस्यानुवाकस्य । आद्यानां विभ्राडनन्तराणां चतसृणां प्रस्कण्वऋषिः, पञ्चम्या आवत्सरः काश्यपऋषिः, षष्ठ्या वेनऋषिः, सप्तम्या कुत्सऋषिरष्टम्या अगस्त्यऋषिः नवम्याः सुतकक्षसुजक्षऋषिः, दशम्याः प्रस्कण्वऋषिरथ चतसृणां जमदग्निऋषि पञ्चदश्यानृमेधाऋषिः, षोडश्याः ऋषिरन्त्याया हिरण्यस्तूप आङ्गिरसऋषिः ॥ पञ्चम्या विश्वेदेवा देवता षष्ठ्याः सोमो देवता अन्यासां सूर्यो देवता आद्या पञ्चमी च जगतीछन्दो द्वितीयादितिस्रो नवमी दशमी च गायत्र्यश्छन्दांसि त्रयोदशी पञ्चदश्यौ पथ्या-वृहत्यौ छन्दसी चतुर्दशी सतो वृहतीछन्दः शेषाः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सप्तत्रिष्टुभश्छन्दांसि सूर्यप्रीतये जपे विनियोगः ॥ ॐ विभ्राड्
बृहत्पिबतुसोम्यम्मध्वायुर्दध० ॥१॥

सोमस्य–ॐ आषाढं युत्सु इति चतसृणां गौतमऋषिः सोमो देवता
त्रिष्टुप्छन्दः सोमप्रीतये जपे विनियोगः ॥ ॐ आषाढं युत्सु० ॥४॥

भौमस्य–ॐ अग्निर्म्मूर्द्धेति विरूपाक्षऋषिरग्निर्देवता गायत्री छन्दो भौम
प्रीतये जपे विनियोगः ॥ ॐ अग्निर्म्मूर्द्धादिवः० ॥१॥

बुधस्य–ॐ उद्बुध्यस्वेति परमेष्ठीऋषिरग्निर्देवता त्रिष्टुप्छन्दो बुधप्रीतये
जपे विनियोगः ॥ ॐ उद्बुध्यस्वाग्नेप्रतिजा० ॥१॥

बृहस्पतेः–ॐ बृहस्पतेऽअति इति गृत्समदऋषिर्ब्रह्मादेवता त्रिष्टुप्छन्दो
बृहस्पतिप्रीतये जपे विनियोगः ॥ ॐ बृहस्पतेऽअति० ॥१॥

शुक्रस्य–ॐ अन्नात्परिस्रुत इति प्राजापत्यश्विसरस्वतीन्द्रा ऋषयः इन्द्रो

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

देवता जगतीछन्दः शुक्रप्रीतये जपे विनियोगः ॥ ॐ अन्नात्-
परिस्रुतोरसम्ब्रह्मणाऽव्यपिबत्क्षत्रम्पयः । सोमम्प्रजापतिः ॥१॥
शनेः—ॐ शन्नोदेवीरिति दध्यङ्ङाथर्वणऋषिरापोदेवता गायत्रीछन्दः
शनिप्रीतये जपे विनियोगः ॥ ॐ शन्नोदेवीरभिष्टयऽआ० ॥१॥
राहोः—ॐ कयानश्चित्र इति वामदेवऋषिरिन्द्रो देवता गायत्रीछन्दो राहु
प्रीतये जपे विनियोगः ॥ ॐ कयानश्चित्रऽआभुव० ॥१॥
केतूनाम्—ॐ केतुंकृण्वन्निति मधुछन्दऋषिरग्निर्देवता गायत्रीछन्दः केतु-
प्रीतये जपे विनियोगः ॥ ॐ केतुंकृण्वन्नकेतवेपेशोम० ॥१॥

अधिदेवतानाम्—
ईश्वरस्य—नमस्ते इति षट्षष्ठिमन्त्रात्मनो रुद्राध्यायस्य परमेष्ठीऋषिरा-
द्यानां षोडशानामेकरुद्रो देवता ततो बहुरुद्रो देवता आद्यागायत्री

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

छन्दस्तिस्रोऽनुष्टुभश्छन्दांसि द्वेजगत्यौ छन्दसी नमो हिरण्यबाहव इत्यतस्त्रिंशद्यजुंषिद्रापेऽअन्धस इत्युपरिष्टाद्बृहतीछन्द इमारुद्रायेति जगती छन्दो यातेरुद्रेत्यनुष्टुप्छन्दस्ततो द्वे त्रिष्टुभौ छन्दसी विकिरिन्द्रेत्याद्या द्वादशानुष्टुभश्छन्दांसि शेषाणि त्रीणि यजूंषि रुद्रप्रीतये जपे विनियोगः॥ नमस्तेरुद्र०जम्भेदध्मः॥६६॥ हवामहे इत्यन्ता षोडशैव वा सूक्तानि रूपनारायणीये।

उमायाः—ॐ श्रीश्चते इति उत्तरनारायणऋषिर्नारायणो देवता त्रिष्टुप्छन्दः उमाप्रीतये जपे विनियोगः॥

स्कन्दस्य—ॐ यदक्रन्द इति भास्करजमदग्निदीर्घतमसऋषयः स्कन्दोदेवता त्रिष्टुप्छन्दः स्कन्दः प्रीतये जपे विनियोगः॥ ॐ यदक्रन्दः० ॥१॥

विष्णोः—सहस्रशीर्षेति षोडाशानां नारायणऋषिः पुरुषो देवता अनुष्टुप्-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

छन्दो अन्त्यायास्त्रिष्टुप्छन्दो विष्णुप्रीतये जपे विनियोगः ॥ ॐ सहस्रशीर्षा० सन्तिदेवाः ॥ १६ ॥

ब्रह्मणः—ॐ आब्रह्मन्निति प्रजापतिर्ऋषिर्ब्रह्मादेवता यजुर्ब्रह्मप्रीतये जपे विनियोगः ॥ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रे० ॥१॥

इन्द्रस्य—ॐ आशुः शिशानः इति द्वादशानां अप्रतिरथऋषिरिन्द्रोदेवता त्रिष्टुप्छन्द इन्द्रप्रीतये जपे विनियोगः ॥ आशुः शिशानः० सचन्ताम्० ॥१२॥

यमस्य—ॐ यमायत्वेति दध्यङ्ङाथर्वणऋषिर्यमो देवता यजुर्यमप्रीतये जपे विनियोगः ॥ यमायत्वाङ्गिरस्वतपितृमते स्वाहा ॥१॥

कालस्य—ॐ कार्षिरसीति दध्यङ्ङाथर्वणऋषिरापो देवता अनुष्टुप्छन्दः कालप्रीतये जपे विनियोगः ॥ ॐ कार्षिरसि० ॥१॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चित्रगुप्तस्य—ॐ चित्रावसो इति ऋषय ऋषयो रात्रिर्देवता जगतीछन्दश्चित्रगुप्तप्रीतये जपे विनियोगः ॥ ॐ चित्रावसो० ॥१॥

प्रत्यधिदेवतानाम्—

अग्नेः—ॐ अस्याजरास इति सप्तदशार्चे आद्याया वत्सऋषिरिन्द्रवायू देवते त्रिष्टुप्छन्दो द्वितीयाया विरूपऋषिरिन्द्रवायू देवते गायत्रीछन्दस्तृतीयाया गौतमऋषिर्मित्रावरुणौ देवते गायत्रीछन्दश्चतुर्थ्या विरूपऋषिरिन्द्रावरुणौ देवते गायत्रीछन्दः पञ्चम्याः कुत्सऋषिः शुक्रो देवता त्रिष्टुप्छन्दः षष्ठ्या वामदेव ऋषिरग्निर्दैवता जगतीछन्दः सप्तम्या विश्वामित्र ऋषिरिन्द्रो देवता त्रिष्टुप्छन्दः अष्टम्या भरद्वाजऋषिरग्निर्दैवता त्रिष्टुप्छन्दो नवम्या भारद्वाज ऋषिर्विश्वेदेवा देवता गायत्रीछन्दो दशम्या मेधातिथिऋषिरग्नि-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दैवता गायत्रीछन्दः एकादश्याः शक्तिपराशरऋषिर्मरुतो देवता-
स्त्रिष्टुप्छन्दो द्वादश्या भारद्वाजऋषिरग्निर्दैवता त्रिष्टुप्छन्दस्त्रयो-
दश्या भारद्वाजऋषिरग्निर्दैवता त्रिष्टुप्छन्दश्चतुर्दशी पञ्चदश्या
वशिष्ठ ऋषिरादित्या देवता बृहतीछन्दः षोडश्या वामदेव ऋषि-
रग्निर्दैवता त्रिष्टुप्छन्दः सप्तदश्या नशोघातक ऋषिः सविताः
देवता त्रिष्टुप्छन्दोऽग्निप्रीतये जपे विनियोगः ॥ ॐ अस्या
जरासः० आघा वृगिमहे० ॥१॥

अपाम्—ॐ आपोहिष्ठेति तिसृणां सिन्धुद्वीपऋषिरापो देवता गायत्री-
छन्दोऽपां प्रीतये जपे विनियोगः ॥ ॐ आपोहि० च न ॥३॥

पृथिव्याः—ॐ स्योनापृथिवीति दध्यङ्ङाथर्वण ऋषिः पृथिवी देवता गाय-
त्रीछन्दः पृथिवी प्रीतये जपे विनियोगः ॥ ॐ स्योनापृथिवी०॥१॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विष्णोः—ॐ सहस्रशीर्षेति नारायण ऋषिः पुरुषो देवता त्रिष्टुपछन्द अन्त्याया अनुष्टुप्छन्दो विष्णुप्रीतये जपे विनियोगः ॥ ॐ सहस्र शीर्षा पुरुषः० ॥ सन्तिदेवाः ॥ १६ ॥

इन्द्रस्य–ॐ आशुः शिशान इति द्वादशर्चा नामप्रतिरथऋषिरिन्द्रोदेवता त्रिष्टुप्छन्दः इन्द्रप्रीतये जपे विनियोगः ॥१२॥

इन्द्राण्याः–ॐ अदित्यैरास्नेति दध्यङ्ङाथर्वण ऋषिरिन्द्राणी देवता यजुरिन्द्राणीप्रीतये जपे विनियोगः ॥ ॐ अदित्यैरास्नासी० ॥१॥

प्रजापतेः–ॐ हिरण्यगर्भ ऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्दः प्रजापतिप्रीतये जपे विनियोगः ॥ ॐ हिरण्यगर्भःसम० देवेभ्यः स्वाहा ॥४॥

अनन्तस्य—ॐ नमोस्तुसर्पेभ्यः ऋचो देवा ऋषयः सर्पा देवताः अनुष्टुप्छन्दः सर्पप्रीतये जपे विनियोगः ॥ ॐ नमोस्तु सर्पेभ्यः० ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सर्पेभ्यः स्वाहा ॥३॥

ब्रह्मणः—ॐ ब्रह्मयज्ञानमिति प्रजापतिरृषिरादित्यो देवता त्रिष्टुप्छन्दो ब्रह्मप्रीतये जपे विनियोगः ॥ ॐ ब्रह्मयज्ञानम्० (पृ० ५३)॥१॥

विनायकादिपञ्चानाम्—

विनायकस्य—ॐ गणनान्त्वेति प्रजापतिरृषिर्गणपतिर्देवता यजुर्गणपति प्रीतये जपे विनियोगः॥ ॐ गणानान्त्वा० वसोमम (पृ० ५४) ॥१॥

दुर्गायाः–ॐ अम्बेऽअम्बिके इति प्रजापतिरृषिः दुर्गा देवताऽनुष्टुप्छन्दो दुर्गाप्रीतये जपे विनियोगः ॥ ॐ अम्बेऽअम्बिके० (पृ० ५४)॥१॥

वायोः–ॐनियुत्वान्वायविति षण्णां आद्याया गृत्समद ऋषिर्द्वितीयायाः पुरुमीढाऽजमीढौ ऋषिस्तिसृणां प्रजापति ऋषिः षष्ठ्या व्यश्वाङ्गिरस ऋषिर्वायुर्देवता द्वितीयाया अनुष्टुप्छन्दः पञ्चम्यास्त्रिष्टुप्छन्दः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शेषाणां गायत्र्यश्छन्दांसि वायुप्रीतये जपे विनियोगः ॥ ॐ नियुत्वान्वायो० अवाथंस्य वृणीमहे ॥६॥

आकाशस्य—ॐ ऊर्ध्वाऽअस्येति द्वादशर्चानां प्रजापतिर्ऋषिरग्निर्देवता उष्णिक्छन्द आकाशप्रीतये जपे विनियोगः ॥ ॐ ऊर्ध्वाऽअस्य० हविरिदं जुषन्ताम् ॥१२॥

अश्विन्योः–ॐ या वाङ्कशेति मेधातिथि ऋषिरश्विनौ देवते गायत्रीछन्दोऽश्विनीप्रीतये जपे विनियोगः ॥ ॐ या वाङ्कशा० (पृ०५५)॥१॥

दिक्पालानाम्—

इन्द्रस्य—ॐ आशुःशिशानेति द्वादशानामप्रतिरथऋषिरिन्द्रो देवता त्रिष्टुप्छन्दः इन्द्रप्रीतये जपे विनियोगः ॥१२॥ ॐ आशुःशिशानः सचन्ताम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अग्नेः—ॐ अस्या जरास० इति सप्तदशर्चमाग्नेयं (पृ० ९४) प्राग्वत् ॥१७॥

यमस्य—यमायत्वेति दध्यङ्ङाथर्वण ऋषिर्यमो देवता यजुः यमप्रीतये
जपे विनियोगः ॥ ॐ यमायत्वाङ्गिरस्वते पितृमते स्वाहा ॥१॥

निर्ऋतेः—ॐ असुन्वन्तमितित्र्यृचस्य प्रजापति ऋषिरग्निर्देवता
त्रिष्टुप्छन्दो निर्ऋतिप्रीतये जपे विनियोगः। ॐ असुन्वन्तम
यजमानं० परिवेद्विश्वतः ॥४॥

वरुणस्य—ॐ इमम्मेवरुणेति द्वयोः शुनःशेफऋषिर्वरुणो देवता गायत्री-
त्रिष्टुभौ छन्दसी वरुणप्रीतये जपे विनियोगः॥ ॐ इमम्मे०
प्रमोषीः ॥२॥

सोमस्य—ॐ आषाढं युत्सु इति सौम्य चतुष्टयं (पृ० ९०) प्राग्वत् ॥४॥

ईशानस्य—ॐ रुद्राध्याय षट्षष्टिर्मन्त्राः ऐशानाः (पृ० ९१) प्राग्वत् ॥६६॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मणः—ॐ ब्रह्मयज्ञानमिति प्रजापतिर्ऋषिरादित्या देवता त्रिष्टुप्छन्दो ब्रह्मप्रीतये जपे विनियोगः ॥ ॐ ब्रह्मयज्ञानम्० (पृ० ५३) ॥१॥

अनन्तस्य—ॐ नमोऽस्तुसर्पेभ्य इति त्र्यृचमनन्तं (पृ० ९६) प्राग्वत् ॥३॥

वस्वादीनाम्—ॐ सुगाव इति देवा ऋषयो वसवो देवतास्त्रिष्टुप्छन्दो वसुप्रीतये जपे विनियोगः ॥ ॐ सुगावो० (पृ० ८५) ॥१॥

आदित्यानाम्—ॐ इमां गिरि इति गृत्समद ऋषिरादित्या देवता त्रिष्टुप्-छन्दः आदित्यप्रीतये जपे विनियोगः ॥ ॐ इमांगिरःअꣳहः ॥१॥

रुद्राणाम्—रुद्राध्यायो रौद्रः (पृ० ९१) प्राग्वत् ॥६६॥

गौरीणाम्—गौरीर्मिमा० इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो मातरो देवता गौर्यादि मातृदेवता प्रीतये जपे विनियोगः ॥ गौरीर्मिमा० (पृ ६०)

मरुताम्—ॐ शुक्रज्योतिश्चेति प्रपर्णां० सप्तर्षय ऋषयो मरुतो देवता आद्या

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थी चोष्णिक् पञ्चमी जगती शेषा गायत्र्यश्छन्दांसि मरुतां
प्रीतये जपे विनियोगः ॥ ॐ शुक्रज्योतिश्च० ॥

विनायकस्य—ॐ गणानान्त्वेति प्रजापति-ऋषिर्गणपतिर्देवता यजुर्विना-
यकप्रीतये जपे विनियोगः । ॐ गणानान्त्वा० गर्भधम् (पृ०५४)

ब्रह्मणः—ॐ आब्रह्मन्निति प्रजापतिऋषिर्ब्रह्मदेवता यजुर्ब्रह्मप्रीतये जपे
विनियोगः ॥ ॐ आब्रह्मन्० (पृ० ४९) ॥१॥

विष्णोः—ॐ सहस्रशीर्षेति वैष्णवं (पृ० ९६) प्राग्वत् ॥१६॥

रुद्रस्य—रुद्राध्यायो रौद्रः (पृ० ९१) प्राग्वत् ॥६६॥

अर्कस्य—ॐ बिभ्राडिति सप्तदशार्चमार्कं (पृ० ८९) प्राग्वत् ॥१७॥

वनस्पतेः—ॐ वनस्पतेवीड्वङ्ग इति प्रजापति-ऋषिर्वनस्पतिर्देवता त्रिष्टुप्-
छन्दो वनस्पतिप्रीतये जपे विनियोगः ॥ ॐ वनस्पते० (पृ० ६२)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उत्तरांगव्याहृतिहोमादिबर्हिर्होमान्तं पूर्णाहुतिं प्राग्भावि कर्म कुर्यात्—

व्याहृतिहोमः—ॐ भूर्भुवः स्वरिति व्याहृतीनां प्रजापतिऋषिरग्निवायु-सूर्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दांसि होमे विनियोगः ॥ ॐ भूः स्वाहा इदमग्नये०, ॐ भुवः स्वाहा इदं वायवे०, ॐ स्वः स्वाहा इदं सूर्याय० ॥

प्रायश्चित्तहोमः—ॐ त्वन्नोऽअग्ने इति वामदेव ऋषिस्त्रिष्टुप्छन्दोऽग्नि-वरुणौ देवते प्रायश्चित्तहोमे विनियोगः। ॐ त्वन्नोऽअग्नेवरुणस्य विद्वान्देवस्यहेडोऽअवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमः शोशुचानोविश्वाद्वेषाᳬसिप्रमुमुग्ध्यस्मत् ॥ स्वाहा इदमग्निवरुणाभ्याम्० ॥ ॐ सत्वन्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दोऽग्निवरुणौ देवते प्रायश्चित्तहोमे विनियोगः ॥ ॐ सत्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोऽ

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अस्याऽउषसोव्युष्टौ । अवयक्ष्वनोवरुणꣳ रराणोवीहिमृडीकꣳ सुहवो
नऽएधि स्वाहा ॥ इदमग्निवरुणाभ्याम्० ॥
ॐ अयाश्चाग्न इति प्रजापति-ऋषिर्गायत्रीछन्दोऽग्निर्देवता प्राय-
श्चित्तहोमे विनियोगः ॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्व-
मित्वमयाऽअसि ॥ अयानोयज्ञंवहास्ययानोधेहिभेषजꣳ स्वाहा ॥
इदमग्नये० ॥
ॐ येतेशतमिति शुनःशेफऋषिर्वरुण-सवितृ-विष्णु-विश्वेदेव-मरुत्-
स्वर्का देवता जगतीछन्दः प्रायश्चित्तहोमे विनियोगः ॥ ॐ ये ते
शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः ॥ तेभिर्न्नोऽ
अद्य सवितोतद्विष्णुर्विश्वे मुञ्चन्तुमरुतः स्वर्काः स्वाहा ॥ इदं
वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ उदुत्तममिति शुनःशेफ ऋषिस्त्रिष्टुप्छन्दो वरुणो देवता क्रमेण पाशान्मोचने विनियोगः ॥ ॐ उदुत्तमंवरुणपाशमस्मदवाधमंविम ध्यमꣳश्रथाय । अथावयमादित्यव्रतेतवानागसोऽअदितयेस्याम ॥ स्वाहा ॥ इदं वरुणाय० ॥

ॐ प्रजापतय इति प्रजापति-ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता प्रायश्चित्तहोमे विनियोगः ॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा ॥

संस्रवप्राशनम्—ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते० ।

पूर्णपात्रदानम्—ॐ अद्येत्यादि देशकालौ स्मृत्वा कृतैतन्नवग्रहशान्तिकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतं ब्रह्मणे तुभ्यमहं संप्रददे।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अभिषेचनम्—ॐ सुमित्रियानऽआपऽओषधयः सन्तु इति सपवित्रप्रणीता-जलेन शिरः अभिषिञ्चेत् ॥ ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टीति सपवित्रप्रणीतापात्रमैशान्यां न्युब्जी कुर्यात् ॥

बर्हिहोमः—आस्तरणक्रमेण बर्हिरुत्थाप्याऽऽज्येनाऽभिघार्य ॐ देवागातुविदो गातुं वित्वागातुमित ॥ मनसस्पतऽइमं देवयज्ञꣳस्वाहा वातेधाः स्वाहा इति हस्तेन बर्हिषि जुहुयात् ॥

महाबलिम्—कुंकुमादिरक्तं सदीपं सवस्त्रं सदक्षिणं—

क्षेत्रपालाय भूत-प्रेत-पिशाच-राक्षस-शाकिनी-डाकिनी-वेतालादि परिवारयुताय इमं बलिं गृहाण मम यजमानस्य आयुः कर्ता क्षेमकर्ता पुष्टिदा भव॥ इमं बलिं शूद्रेण ब्राह्मणेन वा चतुष्पथे क्षिपेत्।

आचार्यः प्रक्षालितपाणिपाद आचामेत् ॥ आचार्यादयो ब्राह्मणाः प्राङ्मुखा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उदङ्मुखा वा ईशाने स्थापितशान्तिकलशजलेन मंगलाभिषेकं कुर्युः—

ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्म-विष्णु-महेश्वराः। वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते। आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः। ब्रह्मणा सहिताः शेषा दिक्पालाः पान्तु ते सदा॥
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः। बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः॥
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः। आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः। देव-दानव-गन्धर्वा यक्ष-राक्षस-पन्नगाः॥
ऋषयो मनवो गावो देव मातर एव च। देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः॥
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च। औषधानि च रत्नानि कालस्यावयवाश्च ये॥
सरितः सागराः शैलास्तीर्थानि जलदा नदाः। एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये॥

स्वशाखोक्ता वैदिकमन्त्राश्च—

ॐ देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम्॥ अश्विनोर्भैषज्येनतेजसेब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येनव्वीर्य्यान्नाद्या

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

याभिषिञ्चामीन्द्रस्येन्द्रियेणब्बलायश्रियैयशसेभिषिञ्चामि ॥ १ ॥
कोसिकतमोसिकस्मैत्वाकायत्वा ॥ सुश्लोकसुमङ्गलसत्यराजन् ॥२॥
शिरोमेश्रीर्यशोमुखन्त्विषिकेशाश्चश्मश्रूणि ॥ राजामेप्राणोऽअमृतꣳ
सम्राट्चक्षुर्विराट्श्रोत्रम् ॥३॥ जिह्वामेभद्रंवाङ्महोमन्युः स्वराड्भा
मः ॥ मोदाः प्रमोदाऽअङ्गुलीरङ्गानिमित्रम्मेसदः ॥५॥ बाहूमेबलमि
न्द्रियꣳ हस्तौमेकर्म्मवीर्यम् ॥ आत्माक्षत्रमुरोमम ॥ ४ ॥ पृष्ठीर्म्मेराष्ट्र
मुदरमꣳ सौग्रीवाश्चश्रोणी ॥ ऊरूऽअरत्नीजानुनीव्विशोमेङ्गानि
सर्वतः ॥ नाभिर्म्मेचित्तंविज्ञानम्पायुर्म्मेपचितिर्भसत् ॥ आनन्दन
न्दावाण्डौमेभगः सौभाग्यम्पसः ॥ जङ्घाभ्याम्पद्भ्यान्धर्मोस्मिविशि
राजाप्रतिष्ठितः ॥ ७ ॥ प्रतिक्षत्रेप्रतितिष्ठामिराष्ट्रेप्रत्यश्वेषुप्रतितिष्ठा
मिगोषु ॥ प्रत्यङ्गेषुप्रतितिष्ठाम्यात्मन्प्रतिप्राणेषुप्रतितिष्ठामिपुष्टे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रतिद्यावापृथिव्योः प्रतितिष्ठामियज्ञ ॥८॥ त्रयादेवाऽएकादशात्रय स्त्रिꣳशाः सुराधसः बृहस्पतिपुरोहितादेवस्यसवितुः सवे ॥ देवादेवै रवन्तुमा ॥९॥ प्रथमाद्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः सत्येन ॥ सत्यं यज्ञेनयज्ञोयजुर्भिर्यजूꣳषिसामभिः सामान्यृग्भिरृचः पुरोनुवाक्या भिः पुरोनुवाक्यायाज्याभिर्याज्यावषट्कारैर्वषट्काराऽआहुतिभिराहुत योमेकामान्समर्द्धयन्तु भूः स्वाहा ॥१०॥ ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳ शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि ॥११॥ ॐ तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येमशरदः शतञ्जीवेमशरदः शतꣳ शृणुयामशरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्यामशरदः शतम्भूयश्चशरदः शतात् ॥ १२ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः ॥ स्वस्तिन
स्ताक्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥१३॥ ॐ विश्वानि
देवसवितर्दुरितानिपरासुव ॥ यद्भद्रन्तन्नऽआसुव ॥१४॥ ॐ यथेमां
वाचङ्कल्याणीमावदानिजनेभ्यः ॥ ब्रह्मराजन्याभ्याᳫंशूद्रायचार्याय
चस्वायचारणायच ॥ प्रियोदेवानान्दक्षिणायैदातुरिहभूयासमयम्मे
कामः समृद्ध्यतामुपमादोनमतु ॥१५॥ ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्च
सीजायतामाराष्ट्रेराजन्यः शूरऽइषव्योतिव्याधीमहारथो जायतान्दो
ग्ध्रीधेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषाजिष्णूरथेष्ठाः सभेयोयुवा
स्ययजमानस्यवीरोजायतान्निकामेनिकामेनःपर्ज्जन्योवर्षतु फलवत्योन
ऽओषधयः पच्यन्तांयोगक्षेमोनः कल्पताम् ॥ ॐ पुनस्त्वादित्यारुद्रा
वसवःसमिन्धतांपुनर्ब्रह्माणोवसुनीथयज्ञैः ॥ घृतेनत्वन्तन्वंवर्द्धयस्व

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सत्याःसन्तुयजमानस्यकामाः॥ दीर्घायुस्तऽओषधेखनितायस्मै चत्वा खनाम्यहम् ॥ अथोत्वन्दीर्घायुर्भूत्वाशतवल्शाविरोहतात् ॥ नतद्र क्षाꣳसिनपिशाचास्तरन्तिदेवानामोजः प्रथमजꣳ ह्येतत् ॥ योबिभ र्तिदाक्षायणꣳ हिरण्यꣳ सदेवेषुकृणुतेदीर्घमायुः समनुष्येषुकृणुतेदीर्घ मायुः ॥ ॐ मनसः काममाकूतिंवाचः सत्यमशीय ॥ पशूनाꣳरूपम न्नस्यरसोयशः श्रीः श्रयताम् ॥१६॥

ततो आचार्यादिभिरभिषिक्तो यजमानः अग्नेः पश्चिमभागे प्राङ्मुखोपविष्ट उदङ्मुखेभ्यः आचार्यर्त्विग्भ्यो दक्षिणां दद्यात् ।

तत्र प्रथमं सूर्यप्रीतये कपिला गोदानम् । देयब्राह्मणं त्रिः सम्पूज्य देयम् । कुशजलेन प्रोक्ष्य—ॐ अद्येत्यादि देशकालौ स्मृत्वा कृतैतन्नवग्रहयज्ञ प्रतिष्ठार्थमिमां कपिलां धेनुं रुद्रदैवतां सूर्यप्रीतये अमुकगोत्राया-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं सम्प्रददे ॥

ॐ कपिले सर्वभूतानां पूजनीयासि रोहिणी । तीर्थदेवमयी यस्मादतः शान्ति प्रयच्छ मे ॥

इति मन्त्रेण ब्राह्मणहस्ते जलं दद्यात् । ब्राह्मणः 'ॐ स्वस्ती'त्युक्त्वा

कामस्तुतिं—ॐ कोदात्कस्माऽअदात्कामो दात्कामायादात् ॥

कामोदाताकामः प्रतिग्रहीता कामैतत्ते ॥

ततोऽनेनैव प्रकारेण देवताभिधानपुरःसरं सोमाय समुद्रदैवतं शंखदानम्—

ॐ पुण्यस्त्वं शङ्ख पुण्यानां मङ्गलानां च मङ्गलम् । विष्णुना विधृतो नित्यमतः शान्ति प्रयच्छ मे ॥

भौमाय रुद्रदैवतं वृषभदानम्—

ॐ धर्मस्त्वं वृषरूपेण जगदानन्दकारकः । अष्टमूर्तेरधिष्ठानमतः शान्ति प्रयच्छ मे ॥

बुधायाग्निदैवतं हिरण्यदानम्—

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्ति प्रयच्छ मे ॥

बृहस्पते बृहस्पतिदैवतं पीतवस्त्रद्वयदानम्—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ पीतवस्त्रयुगं यस्मात् वासुदेवस्य वल्लभम् । प्रदानात्तस्य मे विष्णुरतः शान्तिं प्रयच्छ मे ॥

शुक्राय यमदैवतं श्वेताश्वदानम्—

ॐ विष्णुस्त्वमश्वरूपेण यस्मादमृतसम्भवः । चन्द्रार्कवाहनं नित्यमतः शान्ति प्रयच्छ मे ॥

शनैश्चराय रुद्रदैवतं कृष्णगोदानम्—

ॐ यस्मात्त्वं पृथिवी सर्वा धेनो केशवसन्निभा । सर्वपापहरा नित्यमतः शान्ति प्रयच्छ मे ॥

राहवे यमदैवतं लौहदानम्—

ॐ यस्माद् दुर्गाणि कर्माणि त्वदाधाराणि सर्वदा । हे लोह लौगलादीनि तस्माच्छान्तिं प्रयच्छ मे ॥

केतुभ्योऽग्निदैवतं छागदानम्—

ॐ यस्मात्त्वं सर्वयज्ञानामङ्गत्वेन व्यवस्थितः । यानं विभावसोर्नित्यमतः शान्तिं प्रयच्छ मे ॥

सर्वाश्च दक्षिणाः सूर्यदक्षिणा समाना ज्ञातव्याः, तेन सोमाय शंखं दत्त्वा कपिला गोमूल्यं सुवर्णशंखमूल्यं न्यूनं तदानीमेव दद्यात् ॥ एवं न्यूनस्थले सर्वत्र

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दक्षिणा सूर्यदक्षिणा[1] समा कार्या, आदित्यादि नवग्रहेभ्यः स्वर्णभूषिता-मेकैकां गां वा समानसुवर्णमेव दक्षिणां दद्यात् ॥

ॐ अद्येत्यादि नानावेदाध्यायिभ्यो नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च यथाशक्ति-भूयसी-दक्षिणां दातुमुत्सृजे इति भूरिदक्षिणां दद्यात् ॥ ततो यथाशक्ति पूर्वोक्तहोमसंख्याया ब्राह्मण-भोजनं संकल्पयेत्—ॐ अद्येह कृतस्य नवग्रहमखस्य यथावत्फल-प्राप्तये नानानामगोत्रान्नानानामशर्मणो नानावेदाध्यायिनो ब्राह्मणान् यथोपपन्नेन यथाकालं भोजयिष्ये । इति आमान्नपक्षे यथोपपन्नेन तोषयिष्ये ॥ ततो होता—ॐ अद्येत्यादि कृतस्य नवग्रहशान्तिहोमस्य

---

१ ॐ सुवर्णेन समा कार्या यजमानेन दक्षिणा । सर्वेषामथवा गावो दातव्या हेमभूषिताः ॥
सुवर्णमथवा दद्यात् गुरुर्वा येन तुष्यति । स्वमन्त्रेण प्रदातव्याः सर्वाः सर्वत्र दक्षिणाः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

परिपूर्णतासिद्ध्यथ पूर्णाहुतिं होमयिष्ये ।

पूर्णाहुतिम्—घृतपूर्णस्रुवे नारिकेलादि फलचन्दनपुष्पयुतं वस्त्रं निधाय यजमानान्वारब्धः जुहुयात्—

ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्वानरमृतऽआजातमग्निम् ॥
कविᳯसम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः स्वाहा ॥
पूर्णाहुतिमुत्तमा जुहोतीति ब्राह्मणा ब्रूयुः ।

ततो होता वह्निं पुष्पचन्दनादिना सम्पूज्य स्रुवेण किञ्चिद्भस्म गृहीत्वा—तिलकम्—ॐ त्र्यायुषञ्जमदग्ने इति ललाटे ॥ ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायाम् ॥ ॐ यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले ॥ ॐ तन्नोऽअस्तु त्र्यायुषमिति हृदि यजमानस्य तिलकं कुर्यात् ॥

यजमानः पुनः पुण्याहवाचनं (पृ० १३) कृत्वा गन्धपुष्पादिभिरुपचारै-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रावाहितदेवताः प्रत्येकं युगपद्वा पूजयित्वा प्रणमेत् ॥

विसर्जनम्—यजमानो गुरुर्वा अक्षतप्रक्षेपेण—ॐ उत्तिष्ठ ब्रह्मणस्पतेदेवयन्त-स्त्वेमहे ॥ उपप्रयन्तुमरुतः सुदानवऽइन्द्रप्राशूर्भवासचा ॥

ॐ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् । इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥

घृतच्छाया—यजमानस्ताम्रपात्रस्थं घृतं निरीक्ष्य —

ॐ ध्रुवासिध्रुवोयंयजमानोऽस्मिन्नायतनेप्रजयापशुभिर्भूयात् ।
घृतेनद्यावापृथिवीपूर्येथामिन्द्रस्यछदिरसिविश्वजनस्यच्छाया ॥

ॐ अलक्ष्मीर्यच्चदौस्थ्यं मे सर्वगात्रेष्ववस्थितम् । तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्द्धय ॥

ॐ आज्यं तेजः समुद्दिष्टमाज्यं पापहरं शुभम् । आज्यं सुराणामाहार आज्ये लोकाः प्रतिष्ठिताः ॥
भौमान्तरिक्षदिव्यं वा यन्मे किल्बिषमागतम् । सर्वं तदाज्यसंस्पर्शात् प्रणाशमुपगच्छतु ॥

इति संस्पृश्य ब्राह्मणाय दद्यात् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रतिपत्तिदानम्—यजमान इदं मण्डलाद्युपकरणमाचार्याय प्रतिपादयामि जलेन प्रतिपत्तिरूपं दानं कुर्यात् ।

ॐ प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु च । स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥

ॐ विष्णुः ॐ विष्णुः ॐ विष्णुः ।

प्रार्थयेत्—अञ्जलिं बध्वा ब्राह्मणान् मया यत्कृतं ग्रहशान्तिरूपं कर्म तन्न्यूनातिरिक्तं युष्मद्वचनात्परिपूर्णमस्तु ते च अस्तु परिपूर्णम् ब्रूयुः । ब्राह्मणमन्त्राशिषो गृहीत्वा तान् सानुनयं विसृज्य सुहृन्मित्रादियुतः सोत्साहो भुञ्जीत । इति ग्रहशान्तिविधिः ।

★

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मातृकापूजाविधिः—

प्रयोगः—सन्ध्याकाले कर्ता प्रक्षालितपाणिपादः स्वाचान्तः कृतकुशोपग्रहः प्रथमे द्वारबहिर्देशस्थापितगोमयसप्तदशपिण्डकासु अद्यत्यादि देशकालौ स्मृत्वा प्रागीप्सितामुककर्म प्रतिबन्धकदुरितोपशमनद्वारा मृत्तिकामंगलांगत्वेन विनायकपूजनपूर्वकमादित्यादि सप्तदशगोमयमातृपूजनमहं करिष्ये ॥ सङ्कल्प्य, आवाहयेत्—ॐकारस्य ब्रह्माऋषिर्दैवीगायत्रीच्छन्दः परमात्माऽग्निर्देवता सर्वकर्मारम्भे विनियोगः ॥

ॐ गणानान्त्वेति मन्त्रस्य प्रजापतिर्ऋषिर्यजुर्गणपतिर्देवता गणपतेरा-

---

कस्मिन्कुले मङ्गलपञ्चकं च कस्मिन्कुले मङ्गलसप्तकं स्यात् ।
त्रिमङ्गलं चापि कुले विशुद्धो नोल्लङ्घनीयाः कुलदेशधर्माः ॥१॥
मृत्तिका मङ्गलार्हे च षोडशे स्तम्भमण्डपः । रमणीयः पूर्वमुखः कदलीस्तोरणान्वितः ॥२॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वाहनपूजनयोर्विनियोगः ॥ ॐ गणानान्त्वा० मम। (पृ० ५४)

ॐ भूर्भुवः स्वरितिव्याहृतीनां जमदग्नि-भरद्वाज-भृगवऋषयोऽग्निवायु सूर्या देवता दैवी उष्णिग्दैवी-बृहत्यश्छन्दांसि गणपत्याद्यावाहने विनियोगः ॥ ॐ गणानान्त्वा० मम। (पृ० ५४)

ॐ भूर्भुवः स्वर्गणपत इहागच्छेह तिष्ठ इत्यावाह्य प्रतिष्ठाप्य सुवर्णाद्यर्घ-पात्रजलगन्धपुष्पाक्षतान् क्षिप्त्वा । ॐ गणानान्त्वा० मम। (पृ० ५४) गणपतये नमः इति पञ्चोपचारैः सम्पूज्य वक्रतुण्ड० (पृ० ३२) प्रार्थयेत् ।

ॐ मनोजूतिर्जुषतामाज्ज्यस्यबृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टंयज्ञꣳ समिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामोंर॥प्रतिष्ठ ॥

अक्षतां प्रतिष्ठाप्य—ॐ भूर्भुवः स्वरितिमन्त्रेणादित्यादिसप्तदशगोमय-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मातर[१] इहागच्छत इह तिष्ठत इत्यावाह्य प्रतिष्ठाप्य ।
ॐ अदितिरसि १, ॐ देवमातासि २, ॐ स्वाहासि ३, ॐ सिद्धिरसि ४, ॐ सरस्वत्यसि ५, ॐ कीर्तिरसि ६, ॐ लक्ष्मीरसि ७, ॐ धृतिरसि ८, ॐ मेधासि ९, ॐ पुष्टिरसि १०, ॐ श्रद्धासि ११, ॐ क्रियासि १२, ॐ मतिरसि १३, ॐ बुद्धिरसि १४, ॐ लज्जासि १५, ॐ वपुरसि १६, ॐ शान्तिरसि १७ ॥ प्रत्येकं संस्पृशेत् ॥
चतुर्थ्यन्तमन्त्रैः पञ्चोपचारैः सम्पूज्य प्रत्येकं आदित्यादिसप्तदशगोमयमातरः क्षमध्वं स्वस्थानं गच्छत । समाचारतस्त्रिभिर्मृत्तिकामंगलविधानम्
कलशस्थापनम् (पृ० ८१) मण्डलमध्ये—ॐ मानस्तोके (पृ० ३) मन्त्रेण कलश-

---

१ अदितिर्देवमाता च स्वाहा सिद्धिः सरस्वती । कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ॥ बुद्धिर्लज्जा वपुः शान्तिरेतो गोमयमातरः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्थापनार्थं गोमयालबालः कर्तव्यः ॥ ॐ धान्यमसि० (पृ० १८) मन्त्रेण धान्यपूर्णशरावकम् कलशमुखे निधाय ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्योज्योतिर्ज्योतिः सूर्यः स्वाहा॥ अग्निर्वर्चोज्योतिर्वर्चःस्वाहा सूर्योवर्चोज्योतिर्वर्चः स्वाहा। ज्योतिः सूर्यः सूर्योज्योतिःस्वाहा॥ मन्त्रेण प्रज्वालित दीपं निधाय पूजयेत्। ततो कलशस्कन्धप्रदेशे गणपति-दुर्गा-वाय्वाकाशाश्विनिकुमारान् स्वस्वमन्त्रैः सम्पूज्य। अद्येह देशकालौ स्मृत्वा करिष्यमाणामुककर्मनिर्विघ्नपरिसमाप्त्यर्थं गणपति-दुर्गा-वाय्वाका-शाश्विनीकुमारपूजनमहं करिष्ये।

आवाहन-पूजनमन्त्राश्च—ॐकारस्य ब्रह्माऋषिर्दैवीगायत्रीछन्दः परमात्माऽ-ग्निर्देवता सर्वकर्मारम्भे विनियोगः॥ ॐ भूर्भुवः स्वरितिव्याहृ-तीनां जमदग्नि-भरद्वाज-भृगव ऋषयोऽग्निवायुसूर्या देवता दैवी

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उष्णिग्दैवी बृहत्यश्छन्दांसि गणपत्याद्यावाहने विनियोगः ॥
ॐ गणानान्त्वेतिमन्त्रस्य प्रजापतिर्ऋषिर्यजुर्गणपतिर्देवता गणपतेरावाहनपूजनयोर्विनियोगः ॥ ॐ गणानान्त्वा० (पृ० ५४) पूजयेत् ॥
ॐ अम्बेऽअम्बिकेति प्रजापतिऋषिर्दुर्गादेवताऽनुष्टुप्छन्दो दुर्गावाहनपूजनयोर्विनियोगः ॥ ॐ अम्बेऽअम्बिके० (पृ० ५४) सम्पूज्य ॥
ॐ वातोवेति गन्धर्वा ऋषयो वातोदेवता उष्णिकूछन्दो वाय्वावाहनपूजनयोर्विनियोगः ॥ ॐ वातोवा० ॥ (पृ० ५७) पूजयेत् ।
ॐ ऊर्ध्वाऽअस्येति प्रजापति ऋषिराकाशोदेवता उष्णिकूछन्द आकाशावाहनपूजनयोर्विनियोगः ॥ ॐ ऊर्ध्वाऽअस्य० ॥ (पृ० ८१)
ॐ अश्विनोर्भैषज्येनेति अश्विऋषिरश्विनौ देवते अश्विनीकुमारावाहनपूजनयोर्विनियोगः ॥ ॐ अश्विनोर्भैषज्ये० ॥ (पृ० ८२) पूजयेत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

[१]तोरणमातृपूजाविधिः—उत्सवदिने प्रातःकाले कर्त्ता सुस्नातः शुचिवस्त्रधरः प्रक्षालितपाणिपादः शुक्लगन्धानुलेपनः कृतनित्यक्रियो यजमानः सुवर्ण-रजत-कुशपवित्रान्वितदक्षिणकरो वामहस्ते धृतकुशस्तोरणमातृसमीपे गोमयोपलिप्तभूमिन्यस्त-श्रीपर्ण्यादि प्रशस्तदारुमयपीठोपरि न्यस्तकुशासने प्राङ्मुखोऽन्तर्जानुहस्त उपविश्य तोरणमातृपूजां कुर्यात् ।

कुशतिलजलान्यादाय—ॐ अद्येत्यादि देशकालौ स्मृत्वा अमुककर्म निर्विघ्न-परिसमाप्त्यर्थं गौर्यादिदशतोरणमातृपूजनमहं करिष्ये ॥ मनो-जूति० (पृ० ११८) ॐ भूर्भुवः स्वरितिमन्त्रेण च गौर्यादि दशतोरण मातर इहागच्छत इह तिष्ठतेत्यावाह्य स्थापयेत् ॥

ॐ गौर्यसि १, धनदासि २, नन्दासि ३, मंगलासि ४, विमलासि ५,

---

१ गौरी च धनदा नन्दा मङ्गला विमला बला । गङ्गा च यमुना धात्री विधात्री तोरणाम्बिका ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बलासि ६, गंगासि ७, यमुनासि ८, धात्र्यसि ९, विधात्र्यसि १० ॥
स्व-स्वनाममन्त्रेण प्रत्येकं सम्पूजयेत् ।

[1]सप्तद्वारमातृपूजा—अद्येह करिष्यमाणामुककर्म निर्विघ्नपरिसमाप्त्यर्थं तदङ्गत्वेन नन्दादि सप्तद्वारमातृपूजनमहं करिष्ये ॥ मनोजूति॰ (पृ॰ ११८) ॐ भूर्भुवः स्वः नन्दादिसप्तद्वारमातर इहागच्छतेह तिष्ठतेत्यावाह्य स्थापयेत् ।

ॐ नन्दासि १, नन्दिन्यसि २, वाशिष्ठ्यसि ३, वासुदेवासि ४, भार्गव्यसि ५, जयासि ६, विजयासि ७ ॥ स्वस्वनाममन्त्रैः पूजयेत् ।

शुचिराचान्तः प्राङ्मुखः उपविश्य कुशयवजलान्यादाय—ॐ अद्येत्यादिकर्तव्यामुककर्म निर्विघ्नपरिसमाप्त्यर्थं तदङ्गतया गणेश-दुर्गा-सूर्यादिनव-

---

१ नन्दा नन्दिनि वाशिष्ठे वासुदेवा च भार्गवी । जया च विजया चैव सप्तैता द्वारमातरः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ग्रह-गौर्यादिषोडशमातृ-ब्राह्मयादि सप्तमातृपूजनं चाहं करिष्ये ॥ गणानान्त्वा० (पृ० ५४) गणपतिं पञ्चोपचारैः सम्पूज्य वक्रतुण्ड० (पृ० ३२) प्रार्थयेत् ।

ॐ अम्बेऽअम्बिके (पृ०५४) दुर्गां पूजयेत्। सूर्यादिनवग्रहान् प्रत्येकं पूजयेत् ॥ विनायक भगवति दुर्गे भगवन्तो नवग्रहाः ॥ युष्मत्प्रसादादिदं कर्म निर्विघ्नपरिसमाप्यताम् ॥ क्षमध्वम् ॥ प्रतिमासु भित्तौ पटे लिखितासु वा अक्षतपुञ्जेषु वा गौर्यादि षोडश ब्राह्मयादि [1]सप्तमातॄरपि प्रत्येकं पूजयेत् ।

ॐ गौर्यसि १, ॐ पद्मासि २, ॐ शच्यसि ३, ॐ मेधासि ४, ॐ सावित्र्यसि ५, ॐ विजयासि ६, ॐ जयासि ७, ॐ देवसेनासि ८,

---

१ गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥
धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता ॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही च तथेन्द्राणी चामुण्डा सप्तमातरः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ स्वधासि ९, ॐ स्वाहासि १०, ॐ मातासि ११, ॐ लोकमातासि १२, ॐ धृतिरसि १३, ॐ पुष्टिरसि १४, ॐ तुष्टिरसि १५, ॐ आत्मनः कुलदेवतासि १६। द्वितीयपंक्तौ प्रथमम्—ॐ ब्राह्मयसि १, ॐ माहेश्वर्यसि २, ॐ कौमार्यसि ३, ॐ वैष्णव्यसि ४, वाराह्यसि ५, इन्द्राण्यसि ६, ॐ चामुण्डासि ७॥ ॐ मनोजूति० (पृ० ११८) अक्षतान् प्रतिष्ठाप्य ॐ भूर्भुवः स्वः गौरीहागच्छेह तिष्ठेत्यावाह्य स्थापयित्वा चतुर्थ्यन्तमन्त्रेण पञ्चोपचारैः ब्राह्मयादि सप्तमातृरपि पूजयेत्।

वसुधारा—स्वाचारेण यजमानपत्नी पक्वान्नं शिरसि निधाय वसोर्द्धारां प्रतीच्छेत्

ॐ वसोः पवित्रमसिंशतधारंवसोःपवित्रमसि सहस्रधारम्॥
देवस्त्वासवितापुनातुवसोः पवित्रेण शतधारेण सुप्त्वा कामधुक्षः॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ता॑ सवितुर्वरेण्यस्य चित्रामाहं वृणो सुमतिं विश्वजन्याम् ॥ यामस्यकण्वोऽअदुहत्प्रपीना॑ सहस्रधारा पयसा महीं गामिति ॥ कण्वोहेनां रदद्दर्शसाहस्मै सरोधासर्वान्कामान्दुदुहे तथैवैतद्यजमानायसहस्रधाराः सर्वान्कामान्दुदुहे॥ द्यौः शान्तिः० (पृ० १०८) पुनस्त्वा० (पृ० १०९) च जपेत् । प्रणम्य क्षमापयेत् ॥

इति संक्षेपमातृका[१] पूजाविधिः ।

*

---

१ अदित्यादि सप्तदश गोमयमातरः १७, गौर्यादि दशतोरणमातरः १०, नन्दादि सप्तद्वारमातरः ७, गौर्यादि षोडशमातरः १६, ब्राह्म्यादि सप्तमातरः ॥७॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आभ्युदयिकश्राद्धविधिः—प्रातरिति सम्भवे[1]। अन्यथा रात्र्यादौ पुत्रजन्मनि जातकर्माङ्गभूत नान्दीमुखश्राद्धानुपपत्तेः। अत्र श्राद्धे ब्राह्मणदर्भादिगादि-नियमप्रदर्शित आश्वलायनपरिशिष्टे—आभ्युदयिके युग्मा ब्राह्मणाः। अमूला दर्भाः प्राङ्मुखेभ्य; उदङ्मुखो दद्यादुदङ्मुखेभ्यो वा प्राङ्मुखो द्वौ दर्भौ पवित्रे। कात्यायनः—आभ्युदयिके प्रदक्षिणमुपचारैः पित्र्यमन्त्र-वर्जं जपऋजवोदर्भायवैस्तिलार्थः सम्पन्नमिति तृप्तिप्रश्नोदधिवदराक्षत-मिश्राः पिण्डा नान्दीमुखान् पितॄनावाहयिष्ये इति च प्रश्नः नान्दी-

१ आवाहनं स्वधाशब्दः पिण्डाग्नौकरणं तथा। विकरं पिण्डदानं च साङ्कल्पं षट् विवर्जयेत्॥
साङ्कल्पं तु यदा कुर्यान्न कुर्यात् पात्रपूरणम्॥ तत्र मत्स्यपुराणे—
उत्सवानन्द - सन्तान - यज्ञोद्वाहादिमङ्गले। मातरः प्रथमं पूज्याः पितरस्तदनन्तरम्॥
ततो मातामहानां च विश्वेदेवास्तथैव च। एतच्छ्राद्धं प्रातरेव भवति—
पूर्वाह्णे दैविकं कार्यमपराह्णे तु पैतृकम्। एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम्॥ —शातातपः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मुखाः पितरः प्रीयन्तामित्यक्षय्यस्थाने नान्दीमुखाः पितरः पितामहाः प्रपितामहाः मातामहाः प्रमातामहाः वृद्धप्रमातामहाश्च प्रीयन्तामिति स्वधाप्रयुक्तयुग्मानात्ययनेति। अत्र नान्दीमुखाः पितर इति मातॄणां मातामहानां च प्रदर्शनार्थम्। [१]अर्घदाने विशेषः। अपसव्यकरणपितृतीर्थयोर्निषेधोऽपि।

प्रयोगः—कर्ता प्रातः शुचिराचान्तः प्राङ्मुख उदङ्मुखो वा दीपं प्रज्वाल्य कर्मपात्रं (पृ० ४) कृत्वा श्राद्धदेशंद्रव्याण्यात्मानं च सिञ्चेत्। तत्कुशादिकमादाय ॐ अद्यामुकगोत्राणामस्मन्मातृ-पितामही-प्रपितामहीनाममुकामु-

कात्यायनः—गोत्राणामभिरामन्त्र्य पितृभ्योर्घ्यं निवेदयेत्। नात्रापसव्यकरणं न पितृतीर्थमिष्यते।।
पात्राणां पूरणादीनि दैवेनैव हि कारयेत्। निमन्त्रणे प्रतिज्ञायामक्षय्यासनयोस्तथा।।
एषु षष्ठी प्रयोक्तव्या श्राद्धप्रकरणे बुधैः।।
अक्षय्यासनयोः षष्ठी द्वितीयाऽऽवाहने तथा। अन्नदाने चतुर्थी स्याच्छेषाः सम्बुद्धयः स्मृताः।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कामुकदेवीनां नान्दीमुखीनां तथा अमुकगोत्राणामस्मत्पितृ-पितामह-प्रपितामहानाममुकामुकामुकशर्मणां नान्दीमुखानां तथा अमुकगोत्राणामस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां नान्दीमुखानां वसुसत्यसंज्ञकविश्वेदेवपूर्वकाणाममुककर्माङ्गतया आभ्युदयिकश्राद्धमेभिर्द्रव्यैरहं करिष्ये इति सङ्कल्पं कृत्वा त्रिर्गायत्रीं जपेत् ।

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥ त्रिर्जपेत् ।

दिग्बन्धनं, यवकुशानादाय—ॐ अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् ॥ अपहताऽअसुरा रक्षाᳬंसि वेदिषदः ॥ ॐ तथा बर्हिषदः पान्तु याम्यां ये पितरः स्थिता ॥ ॐ अपहताऽअसुरा रक्षाᳬंसि वेदिषदः ॥ प्रतीचीमाज्यपास्तद्वदपहताऽअसुरारक्षाᳬंसि वेदिषदः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ ऊर्ध्वतस्त्वर्यमारक्षेत्कव्यवाडनलोऽप्यधः । अपहताऽअसुरारक्षा-
ᳬसिव्वेदिषदः ॥

ॐ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः । सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ॥

पूर्वादिदिक्षु यवान् विकिरेत् ॥

नीवीबन्धनम्—ॐ त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ॥
त्वंव्वनेभ्यस्त्वमोषधीभ्यस्त्वन्नृणान्नृपते जायसे शुचिः ॥

आसनम्—ॐ अद्येहाभ्युदयिक श्राद्धे अमुकगोत्राणामस्मन्मातृपितामही-प्रपितामहीनाममुकामुकामुकदेवीनां नान्दीमुखीनां तथा अमुक-गोत्राणामस्मत्पितृ-पितामह-प्रपितामहानां अमुकामुकामुकशर्मणां नान्दीमुखानां तथा अमुकगोत्राणामस्मन्मातामह-प्रमातामह-वृद्ध-प्रमातामहानाममुकामुकामुकशर्मणां सपत्नीकानां नान्दीमुखानां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्राद्धसम्बन्धिनां वसुसत्यसंज्ञकविश्वेषां देवानामिदमासनं वो नमः ॥
ॐ अद्येहामुकगोत्राया मातुरमुकदेव्याः नान्दीमुख्या आभ्युदयिकश्राद्धे इदमासनं ते नमः ॥ ३ ॥ एवमेव पितामही-प्रपितामहीभ्यां दद्यात् ॥
ॐ अद्येहामुकगोत्रस्यास्मत्पितुरमुकशर्मणो नान्दीमुखस्याभ्युदयिकश्राद्धे इदमासनं ते नमः ॥४॥ एवमेव क्रमेण पितामह-प्रपितामहाभ्यां दद्यात्।
ॐ अद्यामुकगोत्रस्यास्मन्मातामहस्यामुकशर्मणो नान्दीमुखस्याभ्युदयिकश्राद्धे इदमासनं ते नमः ॥ एवं प्रमातामह-वृद्धप्रमातामहाभ्यां दद्यात्। ऋज्वमूलकुशरूपमासनं सर्वेभ्यो दद्यात्। ततो गन्धाक्षतपुष्पताम्बूलवस्त्रादिभिः समभ्यर्च्य धूपदीपनैवेद्यं च कारयेत्। यवकुशजलान्यादाय—ॐ अद्याभ्युदयिकश्राद्धेऽमुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाममुकाऽमुकाऽमुकदेवीनां नान्दीमुखीनां तथा अद्याभ्युद-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यिकश्राद्धे अमुकगोत्राणामस्मत्पितृ-पितामह-प्रपितामहानाममुका-
मुकामुकशर्मणां नान्दीमुखानां तथा अद्याभ्युदयिकश्राद्धेऽमुकगोत्रा-
णामस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहानाममुकामुकामुकामु-
कशर्मणां नान्दीमुखानां श्राद्धसम्बन्धिनो वसुसत्यसंज्ञकविश्वेदेवा
एतान्यर्चनविधौ गन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलद्रव्ययज्ञोपवीत
वस्त्राणि वो नमः ॥ ॐ अद्यामुकगोत्राऽस्मन्मातरमुकदेवी नान्दी-
मुखी आभ्युदयिकश्राद्धे एतान्यर्चनविधौ गन्धपुष्पाक्षत-धूप-दीप-
नैवेद्य-ताम्बूल-यज्ञोपवीत-द्रव्यवासांसि ते नमः। एवं पितामही-
प्रपितामहीभ्यां दद्यात्। ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् नान्दी-
मुखाभ्युदयिकश्राद्धे एतान्यर्चनविधौ गन्धपुष्पाक्षतधूपदीपनैवेद्य-
ताम्बूलयज्ञोपवीतद्रव्यवासांसि ते नमः॥ एवं पितामहप्रपितामहाभ्यां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नान्दीमुखाभ्यु-
द्यात् ॥ ॐ अद्यामुकगोत्रास्मन्मातामहामुकशर्मन्
दयिकश्राद्धे एतान्यर्चनविधौ गन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूल-
यज्ञोपवीतद्रव्यवासांसि ते नमः ॥ एवं प्रमातामह-वृद्धप्रमातामहाभ्यां
दद्यात् ।

भूस्वामी, कुशादिकमादाय—इदमामान्नमेतद्भूस्वामिपितृभ्यो नमः ॥

अन्नसङ्कल्पः, तत्र प्रथमं विश्वेदेवानामुत्तानाभ्यां पात्रादिदेवपात्रमालभ्य—ॐ
पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽमृतेऽमृतं जुहोमि
स्वाहा ॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्य
पाᳫंसुरे ॥ कृष्णकव्यामिदं रक्ष मदीयम् ॥ ॐ इदमन्नम् । ॐ इमा
आपः । ॐ इदमाज्यम् । ॐ इदं हविः एतान्युपकरणानीति दक्षि-
णांगुष्ठमारोप्य । ॐ यवोसियवयास्मद्द्वेषोयवयारातिरिति यवान् विकीर्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कुशादिकमादाय—ॐ अद्याभ्युदयिकश्राद्धेऽमुकगोत्राणामस्मन्मातृ-पितामहीप्रपितामहीनाममुकामुकामुकदेवीनां नान्दीमुखीनां तथा अद्याभ्युदयिकश्राद्धेऽमुकगोत्राणामस्मत्पितृ-पितामह-प्रपितामहा-नाममुकामुकामुकशर्मणां नान्दीमुखानां तथा अद्याभ्युदयिकश्राद्धेऽ-मुकगोत्राणामस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहानाममुकामु-कामुकशर्मणां नान्दीमुखानां श्राद्धसम्बन्धिभ्यो वसुसत्यसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो इदमन्नं सजलं सोपस्करं वो नमः ॥ पूर्ववत् पात्रालम्भनादिकं कृत्वा—ॐ अद्यामुकगोत्रायै अस्मन्मात्रेऽमुकदेव्यै नान्दीमुख्यै श्राद्धे इदमन्नं सजलं सोपस्करणं ते नमः ॥ एवं पिता-महीप्रपितामहीभ्यां दद्यात् ॥ ततो पात्रालम्भनादिकं पूर्ववत्—ॐ अद्या-मुकगोत्रायास्मत्पित्रेऽमुकशर्मणे नान्दीमुखायाभ्युदयिकश्राद्धे इद-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मन्नं सजलं सोपस्करणं ते नमः ॥ एवं पितामहप्रपितामहाभ्यां दद्यात् पात्रालम्भनादिकं पूर्ववत् ॥ ॐ अद्यामुकगोत्रायास्मन्मातामहायामुकशर्मणो नान्दीमुखायाभ्युदयिकश्राद्धे इदमन्नं सजलं सोपस्करणं ते नमः ॥ एवं प्रमातामहवृद्धप्रमातामहाभ्यां दद्यात् ॥ गायत्रीं जप्त्वा ॥

ॐ अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् । तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादतः ॥
नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे । नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥

मधुरं पठित्वा—ॐ मधुव्वाताऽऋतायतेमधुक्षरन्तिसिन्धव । माध्वीर्नः सन्त्वोषधीः । मधुनक्तमुतोषसोमधुमत्पार्थिवꣳ रजः । मधुद्यौरस्तुनः पिता । मधुमान्नोवनस्पतिर्मधुमाँ२॥ऽअस्तुसूर्यः । माध्वीर्गावोभवन्तुनः ॥ ॐ मधु मधु मधु ॥ पुरुषसूक्तादिकं पठेत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

[१]विकिरः–ततः प्रागग्रकुशायां भूमौ कुशयवजलान्यादाय–

ॐ असंस्कृतप्रमीतानां त्यागीनां कुलयोषिताम्। उच्छिष्टभागधेयानां दर्भेषु विकिरासनम्॥

कुशरूपमासनमास्तृतकुशात्रयोपरि उत्सृजेत्।

अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम। भूमौ दत्तेन तृप्यन्तु तृप्तायान्तु परां गतिम्॥

दत्तासनकुशोपरि तदन्नं विकिरेत्॥ ततः आचम्य हरिं स्मृत्वा॥ ॐ सुप्रोक्षितमस्तु॥ ॐ शिवा आपः सन्तु। ॐ सौमनस्यमस्तु। ॐ अक्षतं चारिष्टमस्तु पात्रेषु निक्षिप्य॥

अक्षय्योदकम्, सजलयवकुशत्रयमादाय–ॐ अद्यामुकगोत्रास्मन्मातामुकदेवी नान्दी-मुख्याभ्युदयिकश्राद्धे दत्तैतदन्नपानादिभिः प्रीयताम्। एवं पितामहीप्रपितामहीभ्यां दद्यात्। ॐ अद्यामुकगोत्रोऽस्मत्पिताऽमुक-

१ केचिन्नैव कुर्वन्ति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शर्मा नान्दीमुखे आभ्युदयिकश्राद्धे दत्तैतदन्नपानादिभिः प्रीयताम् ॥ एवं पितामहप्रपितामहाभ्यां दद्यात्। ॐ अद्यामुकगोत्रोऽस्मन्मातामहोऽमुकशर्मा नान्दीमुखे आभ्युदयिकश्राद्धे दत्तैतदन्नपानादिभिः प्रीयताम् एवं प्रमातामह-वृद्धप्रमातामहाभ्यां दद्यात्। ततः प्राङ्मुखोऽञ्जलिं बध्वा आशिषः प्रार्थयेत्—ॐ गोत्रन्नो वर्द्धताम्। ॐ वर्द्धताम्। ॐ दातारो नोभिवर्द्धन्ताम्। ॐ वर्द्धन्ताम्। ॐ वेदाः सन्ततिरेव च। ॐ सन्तु ॐ श्रद्धा च नो मा व्यगमत्। ॐ मागात्। ॐ बहुदेयं च नोऽस्तु॥ ॐ अस्तु। ॐ अन्नं च नो बहु भवेत्। ॐ भवतु। ॐ अतिथींश्च लभेमहि। ॐ लभध्वम्। ॐ याचितारश्च नः सन्तु। ॐ सन्तु। ॐ मा याचिषम कञ्चन। ॐ मा याचेथाः। ॐ एताः सत्याशिषः सन्तु। ॐ सन्तु। ततः श्राद्धकर्ता ब्राह्मणहस्तेन तिलकं कुर्यात्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दक्षिणादानम्—अद्याऽमुकगोत्राणामस्मन्मातृपितामही-प्रपितामहीनाममुकामुकामुकदेवीनां नान्दीमुखीनां तथा ॐ अद्यामुकगोत्राणामस्मत् पितृ-पितामह-प्रपितामहानाममुकामुकामुकशर्मणां नान्दीमुखानां तथा ॐ अद्यामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणांनान्दीमुखानामाभ्युदयिकश्राद्धसम्बन्धिनां वसुसत्यसंज्ञकानां विश्वेषां देवानां कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमानि फलमूलानि वनस्पतिदैवतानि तन्मूल्योपकल्पितं द्रव्यं विष्णुदैवतं दक्षिणात्वेन यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय दातुमहमुत्सृजे ॥ पुनर्दक्षिणाद्रव्यमादाय—ॐ अद्यामुकगोत्रायाऽस्मन्मातुरमुकदेव्या नान्दीमुख्याः कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमानि फलमूलानि वनस्पतिदैवतानि तन्मूल्योपकल्पितं द्रव्यं वा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विष्णुदैवतं दक्षिणात्वेन यथानामगोत्रायेत्यादि पूर्ववत्। एवमेव पितामहीप्रपितामहीभ्यां दद्यात् ॥ पुनर्दक्षिणाद्रव्यमादाय—ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणो नान्दीमुखस्य कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमानि फलमूलानि वनस्पतिदैवतानि तन्मूल्योपकल्पितं द्रव्यं विष्णुदैवतं दक्षिणात्वेन यथानामगोत्रायेत्यादि पूर्ववत्। एवमेव पितामह-प्रपितामहाभ्यां दद्यात्। पुनर्दक्षिणाद्रव्यमादाय—ॐ अद्यामुकगोत्रस्यास्मन्मातामहस्यामुकशर्मणे नान्दीमुखस्य कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमानि फलमूलानि वनस्पतिदैवतानि तन्मूल्योपकल्पितं द्रव्यं विष्णुदैवतं दक्षिणात्वेन यथानामगोत्रायेत्यादि पूर्ववत् ॥ एवमेव प्रमातामह-वृद्धप्रमातामहाभ्यां दद्यात् ॥

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमोनमः ॥—त्रिः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ततो दीपाच्छादनम् । हस्तौ पादौ प्रक्षाल्येति पठेत्—

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु च । स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥
आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च । प्रयच्छन्तु तथा राज्यं पितरः श्राद्धतर्पिताः ॥
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतिः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पये तत् ॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥

ॐ यत्कृतं तत्सुकृतमस्तु, यन्न कृतं तद् विष्णुप्रसादाद् ब्राह्मणवचनात् सर्वं परिपूर्णमस्तु, अस्तु परिपूर्णम् ॥ एतत्सर्वं श्राद्धवस्तु विष्णवे प्रतिपादयामि । अत्र ब्राह्मणस्य शर्मान्तं, क्षत्रियस्य वर्मान्तं, वैश्यस्य गुप्तान्तं, शूद्रस्य दासान्तं नामेत्येवावधातव्यम् । स्त्रीणां देव्यन्तनामेति । चातुर्वर्ण्य साधारणम् । इत्याभ्युदयिकश्राद्धविधिः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ग्रहाणां दान-द्रव्य-जपसंख्या

सूर्यदानम्	चन्द्रदानम्	भौमदानम्	बुधदानम्	गुरुदानम्	शुक्रदानम्	शनिदानम्	राहुदानम्	केतुदानम्
माणिक्य	वंशपात्र	विद्रुम पृथ्वी	कांस्यपात्र	पीतधान्य	श्वेतचावल	नीलम तिल	सप्तधान्य	माषान्न
गोधूम गुड	श्वेतचावल	मसूरद्विदल	हरितवस्त्र	पीतव.सुव.	श्वेतचन्दन	मसूर तैल	माषान्न हेमना	कंब. कस्तू.
सवत्सागौ	श्वेतवस्त्र	गोधूमान्न	गजदन्त घृत	घृतपा. पुष्प	श्वेतचित्रवस्त्र	कृष्णवस्त्र	नीलवस्त्र गो	वैडूर्यमणि
कमलपुष्प	श्वेतचन्दन	रक्तवृषभ	मुद्गान्न	पीतफल	श्वेतपुष्प	कुलथी लोहा	कृष्णपुष्प	कृष्णपुष्प
नूतन गृह	श्वेतपुष्प	गुड रक्तचन्दन	सुवर्ण दासी	पुखराज	रजत हीरा	महिषी	खड्ग तिल	तिलतैल
रक्तवस्त्र	चीनी चाँदी	रक्तवस्त्र	सर्वपुष्प रत्न	हरिद्रा अश्व	घृत सुवर्ण	कृष्णधेनु	तैल लोहा	रत्न सुवर्ण
रक्तचन्दन	वृषभ घृत	रक्तपुष्प	कर्पूर शस्त्र	पुस्तक मधु	श्वेताश्व दधि	कृष्णपुष्प	सूप कम्बल	लोहा बोको
सुवर्ण ताम्र	शङ्ख दधि	सुवर्ण ताम्र	अनेकफल	लवणशर्क.	सुगन्धद्रव्य	उपानह	सतिलताम्रपा	शस्त्र
केशर मूँगा	मोति कर्पूर	केशरकस्तूरी	षड्रसभोजन	भूमि छत्र	शर्करागोभूमि	कस्तूरी सुवर्ण	सुवर्ण रत्न	सप्तधान्य
वर्णदक्षिणा	वर्णद०	वर्णद०	वर्णद०	वर्णद०	वर्णदक्षिणा	वर्णदक्षिणा	वर्णदक्षिणा	वर्णद०
जप संख्या	जप सं०	जप सं०	जप सं०	जप सं०	जप सं०	जप सं०	जप सं०	जप सं०
७०००	११०००	१००००	८०००	१९०००	१५०००	२३०००	१८०००	१८०००

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सामान्य सामग्री

पूजा भाँड़ा—तामाको पञ्चपात्र आचमनी २, कर्मपात्र, जलपात्र, अर्घ, त्रिकुटी, पाद्य शंख, दीयो शंख, घण्ट, आरती, छाप्री १, चन्दनखोरी, धुपौरो, थाली, कलश, जपमाला, आसनी ५

पूजासामग्री—जल, जौ, तिल, कुश, चन्दन, रक्तचन्दन, अक्षता, केसरी, अबीर, सिंदूर, कुमकुम, फूलमाला, बेलपत्र, तुलसी, दूबो, धूप, दीप, नैवेद्य, वस्त्र, जनै, सुपारी, भेटी, कपूर।

घृतछाया—कांसको कटौरा, घिउ, सुन-प्रतिमा।

पूर्णपात्र—बोहताभरि चामल, जनै, सुपारी।

रक्षाबन्धन—काँचोधागो, बेसार, सस्यूँ, दही।

सीधा—टपरी, बोहता, डुना, चामल, दाल, घिउ, नून, बेसार, दही, मसला, अचार-तरकारी।

हवन—पीठो, अबीर, गोबर, चामल ६ चारकुने, जौ ५ चारकुने, कलश ५, प्रणीता, प्रोक्षणी, सूरो, आज्यस्थाली, चरुस्थाली, चरु (चामल, जौ, तिल), समिधा, जनै, सुपारी ७, वस्त्र, माटो, भेटी, दक्षिणा।

आभ्युदयिकश्राद्ध—जनै ६, चामल ६ चारकुने, सुपारी ६, सीधा ७, नैवेद्य ६, कुश-ब्राह्मण।

मातृकापूजा—नयाँ पीरा, गोबर, दूबो, वस्त्र, (छीट), अघौंतामा घिउ।

पञ्चगव्य—गोबर, गोमूत्र, दूध, दही, घिउ, कुश, जल

पञ्चरत्न—सुन, चाँदी, मूँगा, पुवालो, मोती।

पञ्चपल्लव(पात)—वर, पीपल, आँप, डुम्री, पाखरी

पञ्चामृत—दूध, दही, मह, घिउ, सख्खर।

सप्तधान्य—धान, गहुँ, जौ, तिल, मास, मूँगी, कागुनु

सप्तमृत्तिका—हात्तीका पाइलाको, घोड़ाका टापको, बग्गीका पांग्राको, धमीराका गोलाको, दहको, गाई गोठको, चौबाटोको।

नवग्रहसमिधा—आँक, पलाश, खयर, अपामार्ग, पीपल, डुम्री, शमी, दूबो, कुश।

सर्वौषधि—कूट, बेसार, जटामसी, चुत्रो, मुरा, श्रीखण्ड, शिलाजीत, बोझो, चाँपो, मोथे।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मन्नं सजलं सोपस्करणं ते नमः ॥ एवं पितामहप्रपितामहाभ्यां दद्यात् पात्रालम्भनादिकं पूर्ववत् ॥ ॐ अद्यामुकगोत्रायास्मन्मातामहायामुकशर्मणो नान्दीमुखायाभ्युदयिकश्राद्धे इदमन्नं सजलं सोपस्करणं ते नमः ॥ एवं प्रमातामहवृद्धप्रमातामहाभ्यां दद्यात् ॥ गायत्रीं जप्त्वा ॥

ॐ अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् । तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादतः ॥

नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे । नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥

मधुरं पठित्वा—ॐ मधुव्वाताऽऋतायतेमधुक्षरन्तिसिन्धव । माध्वीर्नः सन्त्वोषधीः । मधुनक्तमुतोषसोमधुमत्पार्थिवꣳ रजः । मधुद्यौरस्तुनः पिता । मधुमान्नोवनस्पतिर्मधुमाँ२॥ऽअस्तुसूर्यः । माध्वीर्गावोभवन्तुनः ॥ ॐ मधु मधु मधु ॥ पुरुषसूक्तादिकं पठेत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

[1]विकिरः—ततः प्रागग्रकुशायां भूमौ कुशयवजलान्यादाय—
ॐ असंस्कृतप्रमीतानां त्यागीनां कुलयोषिताम् । उच्छिष्टभागधेयानां दर्भेषु विकिरासनम् ॥
कुशरूपमासनमास्तृतकुशत्रयोपरि उत्सृजेत् ।
अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम । भूमौ दत्तेन तृप्यन्तु तृप्तायान्तु परां गतिम् ॥
दत्तासनकुशोपरि तदन्नं विकिरेत् ॥ ततः आचम्य हरिं स्मृत्वा ॥ ॐ सुप्रोक्षितमस्तु ॥ ॐ शिवा आपः सन्तु । ॐ सौमनस्यमस्तु । ॐ अक्षतं चारिष्टमस्तु पात्रेषु निक्षिप्य ॥

अक्षय्योदकम्, सजलयवकुशत्रयमादाय—ॐ अद्यामुकगोत्रास्मन्मातामुकदेवी नान्दी-मुख्याभ्युदयिकश्राद्धे दत्तैतदन्नपानादिभिः प्रीयताम् । एवं पितामहीप्रपितामहीभ्यां दद्यात् । ॐ अद्यामुकगोत्रोऽस्मत्पिताऽमुक-

१ केचिन्नैव कुर्वन्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शर्मा नान्दीमुखे आभ्युदयिकश्राद्धे दत्तैतदन्नपानादिभिः प्रीयताम् ॥ एवं पितामहप्रपितामहाभ्यां दद्यात्। ॐ अद्यामुकगोत्रोऽस्मन्मातामहोऽमुकशर्मा नान्दीमुखे आभ्युदयिकश्राद्धे दत्तैतदन्नपानादिभिः प्रीयताम् एवं प्रमातामह-वृद्धप्रमातामहाभ्यां दद्यात्। ततः प्राङ्मुखोऽञ्जलिं बध्वा आशिषः प्रार्थयेत्—ॐ गोत्रन्नो वर्द्धताम्। ॐ वर्द्धताम्। ॐ दातारो नोऽभिवर्द्धन्ताम्। ॐ वर्द्धन्ताम्। ॐ वेदाः सन्ततिरेव च। ॐ सन्तु ॐ श्रद्धा च नो मा व्यगमत्। ॐ मागात्। ॐ बहुदेयं च नोऽस्तु॥ ॐ अस्तु। ॐ अन्नं च नो बहु भवेत्। ॐ भवतु। ॐ अतिथींश्च लभेमहि। ॐ लभध्वम्। ॐ याचितारश्च नः सन्तु। ॐ सन्तु। ॐ मा याचिष्म कञ्चन। ॐ मा याचेथाः। ॐ एताः सत्याशिषः सन्तु। ॐ सन्तु। ततः श्राद्धकर्ता ब्राह्मणहस्तेन तिलकं कुर्यात्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दक्षिणादानम्—अद्याऽमुकगोत्राणामस्मन्मातृपितामही-प्रपितामहीनाममुकामुकामुकदेवीनां नान्दीमुखीनां तथा ॐ अद्यामुकगोत्राणामस्मत् पितृ-पितामह-प्रपितामहानाममुकामुकामुकशर्मणां नान्दीमुखानां तथा ॐ अद्यामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकशर्मणांनान्दीमुखानामाभ्युदयिकश्राद्धसम्बन्धिनां वसुसत्यसंज्ञकानां विश्वेषां देवानां कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमानि फलमूलानि वनस्पतिदैवतानि तन्मूल्योपकल्पितं द्रव्यं विष्णुदैवतं दक्षिणात्वेन यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय दातुमहमुत्सृजे ॥ पुनर्दक्षिणाद्रव्यमादाय—ॐ अद्यामुकगोत्रायाऽस्मन्मातुरमुकदेव्या नान्दीमुख्याः कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमानि फलमूलानि वनस्पतिदैवतानि तन्मूल्योपकल्पितं द्रव्यं वा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विष्णुदैवतं दक्षिणात्वेन यथानामगोत्रायेत्यादि पूर्ववत्। एवमेव पितामहीप्रपितामहीभ्यां दद्यात्॥ पुनर्दक्षिणाद्रव्यमादाय—ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणो नान्दीमुखस्य कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमानि फलमूलानि वनस्पतिदैवतानि तन्मूल्योपकल्पितं द्रव्यं विष्णुदैवतं दक्षिणात्वेन यथानामगोत्रायेत्यादि पूर्ववत्। एवमेव पितामह-प्रपितामहाभ्यां दद्यात्। पुनर्दक्षिणाद्रव्यमादाय—ॐ अद्यामुकगोत्रस्यास्मन्मातामहस्यामुकशर्मणे नान्दीमुखस्य कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमानि फलमूलानि वनस्पतिदैवतानि तन्मूल्योपकल्पितं द्रव्यं विष्णुदैवतं दक्षिणात्वेन यथानामगोत्रायेत्यादि पूर्ववत्॥ एवमेव प्रमातामह-वृद्धप्रमातामहाभ्यां दद्यात्॥

ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमोनमः॥—त्रिः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ततो दीपाच्छादनम् । हस्तौ पादौ प्रक्षाल्येति पठेत्—

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु च । स्मरणादेवतद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥
आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च । प्रयच्छन्तु तथा राज्यं पितरः श्राद्धतर्पिताः ॥
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतिः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पये तत् ॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥

ॐ यत्कृतं तत्सुकृतमस्तु, यन्न कृतं तद् विष्णुप्रसादाद् ब्राह्मणवचनात् सर्वं परिपूर्णमस्तु, अस्तु परिपूर्णम् ॥ एतत्सर्वं श्राद्धवस्तु विष्णवे प्रतिपादयामि । अत्र ब्राह्मणस्य शर्मान्तं, क्षत्रियस्य वर्मान्तं, वैश्यस्य गुप्तान्तं, शूद्रस्य दासान्तं नामेत्येवावधातव्यम् । स्त्रीणां देव्यन्तनामेति । चातुर्वर्ण्य साधारणम् । इत्याभ्युदयिकश्राद्धविधिः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ग्रहाणां दान-द्रव्य-जपसंख्या

सूर्यदानम्	चन्द्रदानम्	भौमदानम्	बुधदानम्	गुरुदानम्	शुक्रदानम्	शनिदानम्	राहुदानम्	केतुदानम्
माणिक्य	वंशपात्र	विद्रुम पृथ्वी	कांस्यपात्र	पीतधान्य	श्वेतचावल	नीलम तिल	सप्तधान्य	माषान्न
गोधूम गुड	श्वेतचावल	मसूरद्विदल	हस्तिवस्त्र	पीतव.सुव.	श्वेतचन्दन	मसूर तैल	माषान्न हेमना	कंब. कस्तू.
सवत्सागौ	श्वेतवस्त्र	गोधूमान्न	गजदन्त घृत	घृतपा. पुष्प	श्वेतचित्रवस्त्र	कृष्णवस्त्र	नीलवस्त्र गो	वैडूर्यमणि
कमलपुष्प	श्वेतचन्दन	रक्तवृषभ	मुद्गान्न	पीतफल	श्वेतपुष्प	कुलथी लोहा	कृष्णपुष्प	कृष्णपुष्प
नूतन गृह	श्वेतपुष्प	गुड रक्तचन्दन	सुवर्ण दासी	पुखराज	रजत हीरा	महिषी	खड्ग तिल	तिलतैल
रक्तवस्त्र	चीनी चाँदी	रक्तवस्त्र	सर्वपुष्प रत्न	हरिद्रा अश्व	घृत सुवर्ण	कृष्णधेनु	तेल लोहा	रत्न सुवर्ण
रक्तचन्दन	वृषभ घृत	रक्तपुष्प	कर्पूर शस्त्र	पुस्तक मधु	श्वेताश्व दधि	कृष्णपुष्प	सूप कम्बल	लोहा बोको
सुवर्ण ताम्र	शङ्ख दधि	सुवर्ण ताम्र	अनेकफल	लवणशर्क.	सुगन्धद्रव्य	उपानह	सतिलताम्रपा	शस्त्र
केशर मूँगा	मोति कर्पूर	केशरकस्तूरी	षड्रसभोजन	भूमि छत्र	शर्करागोभूमि	कस्तूरी सुवर्ण	सुवर्ण रत्न	सप्तधान्य
वर्णदक्षिणा	वर्णद०	वर्णद०	वर्णद०	वर्णद०	वर्णदक्षिणा	वर्णदक्षिणा	वर्णदक्षिणा	वर्णद०
जप संख्या	जप सं०	जप सं०	जप सं०	जप सं०	जप सं०	जप सं०	जप सं०	जप सं०
७०००	११०००	१००००	८०००	१९०००	१५०००	२३०००	१८०००	१८०००

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सामान्य सामग्री

पूजा भाँड़ा—तामाको पञ्चपात्र आचमनी २, कर्म-पात्र, जलपात्र, अर्घ, त्रिकुटी, पाद्य शंख, दीयो शंख, घण्ट, आरती, छाप्री २, चन्दनखोरी, धुपौरो, थाली, कलश, जपमाला, आसनी ५

पूजासामग्री—जल, जौ, तिल, कुश, चन्दन, रक्त-चन्दन, अक्षता, केसरी, अबीर, सिंदूर, कुम-कुम, फूलमाला, बेलपत्र, तुलसी, दूबो, धूप, दीप, नैवेद्य, वस्त्र, जनै, सुपारी, भेटी, कपूर।

घृतछाया—कांसको कटौरा, घिउ, सुन-प्रतिमा।

पूर्णपात्र—बोहताभरि चामल, जनै, सुपारी।

रक्षाबन्धन—काँचोधागो, बेसार, सर्स्यूं, दही।

सीधा—टपरी, बोहता, दुना, चामल, दाल, घिउ, नून, बेसार, दही, मसला, अचार-तरकारी।

हवन—पीठो, अबीर, गोदर, चामल ६ चारकुने, जौ ५ चारकुने, कलश ५, प्रणीता, प्रोक्षणी, सूरो, आज्यस्थाली, चरुस्थाली, चरु (चामल, जौ, तिल), समिधा, जनै, सुपारी ७, वस्त्र, माटो, भेटी, दक्षिणा।

आभ्युदयिकश्राद्ध—जनै ६, चामल ६ चारकुने, सुपारी ६, सीधा ७, नैवेद्य ६, कुश-ब्राह्मण।

मातृकापूजा—नयाँ पीरा, गोबर, दूबो, वस्त्र, (छीट), अघौंतामा घिउ।

पञ्चगव्य-गोबर, गोमूत्र, दूध, दही, घिउ, कुश, जल

पञ्चरत्न—सुन, चाँदी, मूँगा, पुवालो, मोती।

पञ्चपल्लव(पात)—वर, पीपल, आँप, डुम्री, पाखरी

पञ्चामृत—दूध, दही, मह, घिउ, सख्खर।

सप्तधान्य—धान, गहुँ, जौ, तिल, मास, मूँगी, कागुनु

सप्तमृत्तिका—हात्तीका पाइलाको, घोड़ाका टाप-को, बग्गीका पांग्राको, धमीराका गोलाको, दहको, गाई गोठको, चौबाटोको।

नवग्रहसमिधा—आँक, पलाश, खयर, अपामार्ग, पीपल, डुम्री, शमी, दूबो, कुश।

सर्वौषधि—कूट, बेसार, जटामसी, चुत्रो, मुरा, श्रीखण्ड, शिलाजीत, बोझो, चाँपो, मोथे।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal